कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-431

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M431 विषय काव्य.
नाव. शिशुपालवधम् (प्रथमसर्ग) Mss..
लेखक/लिपीकार माघकविकृत..
पृष्ठ 30 काळ [✓ पूर्ण]/अपूर्ण

Checked 2012

M-431

॥ अथमाघसर्गप्रथमप्रारंभः॥ श्रीसी॥
।द्धेश्वरप्रसरभ॥ ॥

[illegible]

श्रीगणेशायनम[illegible]रस्वत्यैनमः ॥ श्रीकृष्णायनमः ॥ इंदीवरदलश्याम
मिंदिरानंदकंदलं ॥ वंदारुजनमंदारं वंदेहं यदुनंदनं ॥१॥ दंताचलेन धरणी
तलमुन्नमय्य पातालकेलिषु धृतादिवराहलीलं ॥ उल्लाघनोत्फफणाधरगी ण
यमानं क्रीडावदानमिभराजमुखं नमामि ॥२॥ शारदा शारदांभोजवदना
वदनांबुजे ॥ सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात् ॥३॥ वाणीं काण
भुजीमजीगणदवासासीच्च वैयासिकीमंतस्तंत्रपरंस्त पन्नगगवीगुंफेषु चा
जागरीत् ॥ वाचामाकलयद्रहस्यमखिलं यश्चाक्षपादस्फुरां लोकेभूद्यदुपज्ञमे
व विदुषां सौजन्यजन्यं यशः ॥४॥ मल्लिनाथः सुधीः सोयं महोपाध्यायशब्दभाक्
॥ विवित्ते माघकाव्यस्य व्याख्यां सर्वंकषाभिधां ॥५॥ ये शब्दार्थपरीक्षणप्रणयि
नो ये वा गुणालंक्रियाशिक्षाकौतुकिनो विहर्तुमनसो ये च ध्वनेरध्वगाः ॥ तु

भ्यश्चावनरंगितेरससुधापूरे मिमंक्ष्यंति युतेषामेवकृते करोति विवृत्तिं माघस्य सर्वंकषा
॥६॥ नेतास्मिन्यदुनंदनः स भगवान्चीरप्रधानं रसः श्रृंगारादिभिरंगवान्चधयते पूर्णा पुन
र्वर्णना॥ इंद्रप्रस्थगमाद्युपायविषयश्चैद्यावसादः फलं धन्यो माघकविर्वयंतु कृतिनस्तत्सूक्ति
संसेवनात्॥७॥ इहान्वयमुखेनैव सर्वं व्याख्यायते मया॥ नामूलं लिख्यते किंचिन्नानपेक्षित
मुच्यते॥८॥ अथ तत्र भगवान्माघकविः काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये
सद्यः परनिर्वृत्तये कांतासंमिततयोपदेशयुजे॥ इत्यालंकारिकवचनप्रामाण्यात्काव्यस्या
नेकश्रेयःसाधनतां काव्यालापांश्च वर्जयेदिति निषेधस्यासत्काव्यविषयतां च पश्यन् शिशुपा
लवधाख्यं काव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाध
नत्वात् आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखमित्याशीराद्यन्यतमस्य प्रबंधमुखलक्षण
त्वात्काव्यफलं शिशुपालवध बीजरूपं भगवतः कृष्णस्य नारददर्शनरूपं वस्त्वादौ श्रीशब्द
प्रयोगपूर्वं निर्दिशन्कथामुपाक्षिपति॥ श्रियइति॥ अत्रादौ श्रीशब्दप्रयोगाद्वर्णगणा

माघ

टीका

गणादिशु द्विरभ्यस्तः ॥ तदुक्तं ॥ देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ॥ ते सर्वे नैव निंद्याः स्युर्लि
पितो गणतोपि वेति ॥ श्रियः लक्ष्म्याः पतिः एतेन रुक्मिणीरूपाया श्रिया समेत इति सूचितं ॥ राघत्वे
॥१॥ भवेत्सीता रुक्मिणी कृष्णजन्मनि इति विष्णुपुराणे ॥ जगन्निवासो जगतामधारः कुक्षिस्थाखिल
भुवन इति भावः ॥ तथापि जगत् लोकं शासितुं दुष्टनिग्रहशिष्टानुग्रहाभ्यां नियंतुं श्रीमति सदाल
क्ष्मीयुक्ते वसुदेवसद्मनि वसुदेवरूपिणः कश्यपस्य वेश्मनि वसन् कृष्णरूपेण तिष्ठन् हरिर्विष्णुरंबरा

॥ श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि ॥ वसन्ददर्शा ॥
॥ वतरंतमंबराद्धिरण्यगर्भांगमुनिहरिः ॥ १ ॥

॥१॥

तं अवतरंतं आपतंतं इंद्रसंदेशकथनार्थमिति भावः हिरण्यस्य गर्भो हिरण्यगर्भो ब्रह्मा प्रभव
त्वात्तस्यांगभुवं तनूजं अथवा तस्यांगाद्वयवादुत्संगाख्याद्भवतीति हिरण्यगर्भांगभूः तं मुनिं
नारदमित्यर्थः ॥ उत्संगान्नारदो जज्ञे दक्षोंगुष्ठात्स्वयंभुव इति भागवते ॥ ददर्श कदाचिदिति शे
षः ॥ अत्रात्मीयसि वसुदेवसद्मनि सकलजगदाश्रयतया महियसो हरेराधेयत्वकथनादधिक
प्रभेदोर्थालंकारः ॥ तदुक्तं ॥ आधाराधेययोरानुरूप्याभावोधिको मत इति जगन्निवासस्य ज

श्रीरांक

गदेकदेशनिवासत्वमिति विरोधश्च तथा तकारसकारादेः केवलस्यासकृदावृत्या जगज्जगदिति ॥
सकृद्व्यजनदेशान्निद्वयसादृशाच्च वृत्त्यनुप्रासभेदौ शब्दालंकारौ ॥ एषां चान्योन्यापेक्ष्येणैकत्रसमावेशा
त्तिलतंदुलवत्संसृष्टिः ॥ सर्गेस्मिन्वंशस्थवृत्तं ॥ गतौ नु वंशस्थमुदीरितं जराविति लक्षणात् ॥१॥ श्री ॥
तदानीं जनैर्विस्मयादीक्षितं प्रवृत्तमित्याह ॥ अविद्यमानावूरू यस्य सोनूरुः ॥ स सारथिर्यस्य सः तस्यानू
रुसारथेः सूर्यस्य गतं गतिः ॥ भावे क्तः ॥ तिरश्चीनं तिर्यग्भूतं विभाषाचेरदिक्स्त्रियामिति तिर्यक्शब्दा

॥ द्विधालतात्मा किमयं दिवाकरो विधूमरोचिः किमयं हुताशनः ॥ गतं तिरश्चीनमनूरु ॥
॥ सारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः ॥ पतत्यधो धाम विसारि सर्वतः किमेतदित्याकु ॥
लमीक्षितं जनैः ॥ षट्पदी ॥२॥

दतस्यं ताप्रातिपदिकात्स्वार्थे ख प्रत्ययः ॥ हविर्भुजोग्नेरूर्ध्वज्वलनं तूर्ध्वस्फुरणं प्रसिद्धं इदं तु सर्वतो विसा
रिधामाधः पततीति ॥ किमेतदिति सूर्याग्निविलक्षणमदृष्टपूर्वमिदं धाम किमात्मकं स्यादिति आकुलं विस्म
यसंभ्रांतं यथा तथा जनैरीक्षितमीक्षणं हृतं सकर्मकादप्यविवक्षिते कर्मणि भावे क्तः ॥ प्रसिद्धेरविवक्षा
तः कर्मणोकर्मिका क्रियेत्ये[illegible]तिवच्चनात्क्वचित्कर्मणि क्तांतं कृत्वा ईक्षितं मुनिं हरदशेति पूर्वेण योज

यंति अत्रोपमेयस्य मुनिधाम्नः सूर्याग्निभ्यां उपमानाभ्यां तदसंभविना अधःप्रसरणधर्मेणाधि
क्यवर्णनाद्व्युतिरेकः ।। तदुक्तं काव्यप्रकाशे उपमानाद्यदन्यस्य व्यतिरेकः स एव सः इति ।।२।। श्री श्री ।।
अथ भगनाभिरणेषी द्दिसाह ।। विभुस्त्वावधारणसमर्थः ।। स हरिः पुरा प्रथमं त्विषां चय इत्यवधा
रितं तेजःपुंज्यमात्रत्वेन निश्चितं ततः प्रत्यासन्ने विभाविता विमृष्टा आकृतिः संस्थानं यस्य तं तथोक्तं

।। चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिं ।। विभुर्विभक्ता ।।
।। वयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः ।।३।।

।। अत एव शरीरी चेतन इत्यवधारितं ततो विभक्ताः विविच्य गृहीताः अवयवा मुखादयो यस्य तं अ
त एव पुमानिति अवधारितं अमुमागच्छंतं व्यक्तविशेषं नारदं वास्तवाभिप्रायेणेति पुल्लिंगनिर्वाहः ।।
क्रमात् पूर्वोक्तसामान्यविशेषज्ञानक्रमेण लोकदृष्ट्या चेदमुक्तं हरिस्तु सर्वं वेदैवेति तत्वं नारद इ
त्यबोधि नारदं बुद्धवानित्यर्थः नारदस्य कर्मत्वेपि निपातेनेति शब्देनाभिहितत्वाभ द्वितीया उगव्यु
पसंख्यानस्योपलक्षणत्वात् यथाह वामनः निपातेनाभिहिते कर्मणि न कर्मविभक्तिः ।। परिगण

स्यश्राथिकत्वादिति ॥ बुध्यतेः कर्तरि लुङ् ॥ दीपजनेत्यादिना चिण् ॥ चिणो लुगिति तस्य लुक् ॥ अ
र्थविभावितो हृति विभक्तावयवमित्याहृति विभाविते काव्यलिंगमुदाहृतमिति लक्षणात् ॥ ३ ॥
अथ सप्तभिर्मुनिं चिरानष्टि ॥ कीदृशं ॥ अमुं नवान् सद्यःसंभृतसलिलनतिनीलानि तियावत् ॥ बृह
तो विपुलान्पयोधरान् मेघानधोधः ॥ मेघानां समिपाधःप्रदेशे स्थितमिति शेषः ॥ उपर्यध्यधसः सो

॥ नवानधोधो बृहतः पयोधरान् समूढकर्पुरपरागपांडुरं ॥
॥ क्षणंक्षणोत्क्षिप्तगजेंद्रकृत्तिना स्फुटोपमं भूतिसितेन शंभुना ॥ ४ ॥

मिप्यइति द्विर्भावः तद्योगे द्वितिया ॥ अभिसर्वतसोः कार्याधिगुपर्यादिषु त्रिषु ॥ द्वितिया म्रेडितांतेषु त
तोन्यत्रापि दृश्यतेई इति वचनात् ॥ समूढः पूंजीकृतः समूढपुंजितेभग्नेइति विश्वः ॥ कर्पुरस्य परागश्चु
र्णस्तद्वत् पांडुरमत एव लक्षणं मेघसमिपावस्थानक्षणे अत्यंतसंयोगा द्वितिया ॥ क्षणेषु नांउनोत्स
वेषु ॥ निर्व्या[illegible]पारस्थितौ कालविशेषोत्सवयोः क्षण इत्यभयत्रापि अमरः ॥ उत्क्षिप्ता उपरिधारि
ता गजेंद्रस्य कृत्तिश्चर्म येन तेन अजिनं चर्म कृत्तिः स्त्रीत्यमरः ॥ भूत्या भस्मना सितेन भूतिर्भस्म

स्मनि संपदीत्यमरः ॥ शंभुना स्फुटा उपमा सादृश्यं यस्य तं स्फुटोपमं स्फुटशंभूपममित्यर्थः ॥ सापक्षत्वे
॥४॥ पित्वेपि गमकत्वात्समासः ॥ सदृशापर्याययोरतुलोपमाशब्दयोरतुलोपमाभ्यामिति निर्देशात्सादृशवा
चित्वे तृतीयेत्याहुः ॥ केचिदिमं श्लोकं चयस्त्विषामित्यतः प्राग्लिखित्वा व्याचक्षते तेषां पूरत्वावधात्साकृ
तेजःपिंडमात्रस्य शंभूपमौचित्यं चिंत्यं ॥४॥ पुनः अंभोरुहकेसरद्युतीः पद्मकिंजल्कप्रभाः पिशांगी

॥दधानमंभोरुहकेसरद्युतीर्जटाः शरच्चंद्रमरीचिरोचिषं॥
॥विपाकपिंगास्तुहिनस्थलीरुहो धराधरेंद्रं व्रततीततीरिव॥५॥

॥४॥ श्रीशाकं०

रित्यर्थः जटाः दधानं स्वयं तु शरच्चंद्रमरीचिरिव रोचिर्यस्य तं धवलमित्यर्थः अंत एव विपाकेन
परिणामेन पिंगाः पिंगलाः तुहिनस्थल्यां रोहंतीति क्विप् ॥ व्रततीततीः लताव्यूहान् वल्ली तु व्रतति
र्लतेत्यमरः दधानं धराधरेंद्रो हिमवान् तुहिनस्थलीति लिंगात् अन्यथा नारदोपमानतासंभवा
च्चतमिव स्थितं ॥५॥

पुनः मुंजस्तृणविशेषः तन्मयी मेखला मौंजी । पिंशाग्या मौंज्या युस्युत । इति पिंशागमौंजीयुक्
तं सत्सुद्विषेत्यादिना क्विप् ॥ स्त्रियाः पुंवदित्यादिना पिशंगीशब्दस्य पुंवद्भावः ॥ अर्जुनच्छविं
धवलकांतिं ॥ वलक्षो धवलोऽर्जुन इत्यमरः अंजनद्युतिं अंजनवर्णं एणाजिनं कृष्णचर्म वसा मृग २

॥ पिशंगमौंजीयुजमर्जुनच्छविं वसानमेणाजिनमंजनद्युति ॥
॥ सुवर्णसूत्राकलिताधरांबरां विडंबयंतं शितिवाससस्तनुं ॥६॥ स २

नं आच्छादयंतं वसन् आच्छादन इति धातोः शानच् सुवर्णसूत्रेण कनकमेखलया आकलितं र्ण
बद्धं अधरांबरं अंतरीयकं यस्यास्तां शितिवाससो नीलांबरस्य रामस्य तनुं विडंबयंतं अनु
कुर्वाणमित्यर्थ उपमा ॥६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पुनः विहंगराजांगरुहै रिव गरुत्सलोमतुल्यैः कुतः आयतैः दीर्घैः हिरण्यविकारो हिरण्मयी दांडिनायनेत्यादिना मयट्टिय लोपनिपातः तस्याम् वीरुहाः रूढाः इगुपधलक्षणः कप्रत्ययः

॥ विहंगराजांगरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितंतुभिः ॥
॥ कृतोपवीतं हिमशुभ्रमुच्चकैर्घनं घनांते तडितांगुणैरिव ॥७॥

तासां वल्लीनां तंतुभिः तंतुतुल्यैः सूक्ष्मावयवैः उपादानगुणाद्धिरण्मयैः कृतोपवीतं शोभार्थं कल्पितं यज्ञसूत्रं स्वयं हिमवच्छुभ्रं अत एव घनांते शरदि तडितां गुणै रूपलक्षितं उच्चैरोवोच्चकैरुन्नतं घनं मेघमिव स्थितं ॥७॥ ॥ ॥ ॥

पुनः निसर्गात् स्वभावादेव विचित्राणि कृष्णसाराणि उज्वलानि भास्वराणि सूक्ष्माणि लोमा पक्ष्माणि
नि यस्य तेन लसन्यो बिसच्छेदो मृणालखंडः तद्वत्सिते अंगे वपुषि संगिना सक्तेन चारुणा च
मूरुचर्मणा मृगत्वचा कुथेन पृष्ठास्तरणे प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयो रित्यमरः

॥ निसर्गचित्रोज्वलसूक्ष्मपक्ष्मणा लसद्बिसच्छेदसितांगसंगिना ॥
॥ चकासतं चारुचमूरुचर्मणा कुथेन नागेंद्रमिवेंद्रवाहनं ॥८॥

इंद्रवाहनं नागेंद्रं ऐरावतमिव इंद्रस्य वाहनमिति स्वस्वामिभावमात्रस्य विवक्षितत्वान्न
वाहनमाहितादिति णत्वं यथाह वामनः ॥ नागेंद्रवाहनशब्देन त्वमाहितत्वस्याविवक्षि
तत्वादिति ॥ चकासतं दीप्यमानं चकासतेः शतरि नाभ्यस्ताच्छतुरिति नुमभावः जक्षित्या
दयः षडित्यभ्यस्तसंज्ञा ॥८॥ श्री शके ।८ ।। ।। ।।

पुनरजस्रं प्राचूर्येण आस्फालिताः ताडिताः सौष्टवपरिक्षार्थं न्युज्यांगुष्टेन तंत्रीताडनं प्रसिद्धं ।। तेषां वल्लकी
गुणानां वीणातंत्रीणां क्षतेन संघर्षणेनुज्वलैरंगुष्टनखांशुभिर्भिन्नया मिश्रितया तद्रागरक्तयेत्यर्थः अत
।।६।।२ एव पुरः पुरोभागे प्रवालैर्विद्रुमैः ।। मुक्ताथ विद्रुमः पुंसि प्रवालं पुन्नपुंसकमित्यमरः ।। पूरितार्द्धयेव स्थि
तया अच्छस्फटिकाक्षमालया अच्छस्फटिकानामक्षमाभलातया जपमालयेत्यर्थः ।। तथा प्रसिद्धः स्फटिकग

।। अजस्रमास्फालितवल्लकीगुणक्षतोज्वलांगुष्टनखांशुभिन्नया ।। ।।९
।। पुरः प्रवालैरिव पूरितार्द्धया विभांतमच्छस्फटिकाक्षमालया ।। ९ ।। श्रीराकर

गुणात् श्लेषे मोक्षार्थित्वं व्यज्यते ।। स्फटिको मोक्षदः परमिति मोक्षार्थिनां स्फटिकाक्षमालाभिधानात् ।।
विभांतं भासमानं भातेः शतृप्रत्ययः ।। अत्र नखांशुभिन्नतयेति स्वगुणत्यागेनान्यगुणस्वीकारलक्षणस्त
द्गुणालंकार उक्तः ।। तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाहृतिरिति लक्षणात् ।। तदुत्थापिता चेयं प्रवालपू
रितार्द्धत्वोत्प्रेक्षा तनयोरंगांगीभावेन संकरः ।। ९ ।। ।। ।। ।। ।।

पुनः नभस्वतो वायोराघट्टनया आघातेन पृथगसंकिर्णैरणद्भिर्ध्वनद्भिः अनुरणनात्मकोत्पद्यमानै
रित्यर्थः॥ श्रुत्यारब्धमनुरणं स्वर इति लक्षणात्॥ तदुक्तं रत्नाकरे॥ श्रुतिर्नाम स्वरारंभकावयवः
शब्दविशेषः॥ तदुक्तं॥ प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः॥ सा श्रुतिः संपरिज्ञेया स्वराव
या.वयवलक्षणेति॥ विभिन्नानि प्रतिनियतसंख्यया व्यवस्थितानि॥ श्रुतीनां मंडलानि स

॥ रणद्भिराघट्टनया नभस्वतः पृथग्विभिन्नश्रुतिमंडलैः स्वरैः॥
॥ स्फुटीभवद्ग्रामविशेषमूर्छनामवेक्षमाणं महतीं मुहुर्मुहुः॥१०

मूहाः येषां ते तैः विभिन्नश्रुतिमंडलैः॥ श्रुतिसंख्यानियमे दंतिलः॥ चतुश्चचतुश्चैव ष
ड्जमध्यमपंचमाः॥ द्वे द्वे निषादगांधारौ त्रिस्त्रिर्ऋषभधैवतौ॥ स्वराः षड्जादयः सप्तलक्ष
णाः तदुक्तं॥ श्रुतिभ्यः स्युः स्वराः षड्जर्षभगांधारमध्यमाः॥ पंचमो धैवतश्चाथ नि

षादइति सप्तसे।।तेषां संज्ञाः सरिगमपध नि इत्युपरामनाइत्ति।।तैःस्वरैः स्फुटीभव
द्योग्रामविशेषाणां षड्जापरनामकानां स्वरसंघातभेदानां त्रयाणां मूर्छनास्वरारोहा
वरोहक्रमभेदायस्यां तां महतीं।।निजवीणां विश्वावसोस्तु बृहती तुंबरोस्तु कलावती।।
महती नारदस्यस्यात्सरस्वत्यास्तु कच्छपी।।तिवैजयंत्ति।।मुहुर्मुहुरवेक्षमाणं तंत्रीयोज
नाभेदलक्षणमहिम्नापुरुषप्रयत्नमंतरेणैवाविसंवादं ध्वनतीति कौतुकादनुसंधान
मित्यर्थः।।अथग्रामलक्षणं यथाकुटुंबिनः सर्वेप्येकीभूता भवंति हि।।तथास्वराणांसं
दोहो ग्रामइत्यभिधीयते।।षड्जग्रामो भवेदादौ मध्यमग्राम एव च।।गांधारग्राम
इत्येतद्ग्रामत्रयमुदाहृतं।।तथानंद्यावर्त्तोथजीमूतःसुभद्रो ग्रामकास्त्रयः।।षड्जमध्य
मगांधारास्त्रयाणां जन्महेतवइति मूर्छनालक्षणं च।।क्रमात्स्वरा स्वराणां सप्ता
नामारोहश्चावरोहणं।।सा मूर्छेत्युच्यते ग्रामस्था एताः सप्त सप्त च।।ग्रामत्रयेपि
प्रत्येकं सप्त सप्त मूर्छा भवंति।।तन्नामानि तु नानपेक्षितमुच्यत इति प्रतिज्ञाभंग

भयान्न लिख्यंतइति सर्वमवदातं ॥ अत्रपुंव्यापारमंतरेण स्वराघाविभीतोक्त्याको
पिलोकातिक्रांतोयः शिल्पसौष्ठवातिशयो वीणायाः प्रतीयते न स्वहस्ततः सिद्धाशय
स्याभेदेनाध्यवसितत्वात्तन्मूलातिशयोक्तिरलंकारः ॥ सा च महत्साशंपुंव्यापारविना
मूर्च्छासंबंधोभिधानात् असंबंधरूपतया च पुंव्यापाराख्यरूपकारणं विनापि मू

नती ॥ निवर्ण्य सोनुव्रजतः कृतानतीनतींद्रियज्ञाननिधिन्नभःसदः ॥
॥ सभासदस्तादित्तेरैत्यसंपदः पदं महेंद्रालयचारुचक्रिणः ॥ ॥३१॥

धीदिकार्यपेत्तिविधोतनां द्विभावना व्यज्यतइति अलंकारेण अलंकारे ध्वनिरिति
संक्षेपः ॥३०॥ निवर्ण्येति ॥ अतींद्रियमतिक्रांता देशकालस्वरूपात् विप्रकृष्टार्थाः ॥
अश्नादयः क्रांताद्यर्थे द्वितीयेति समासः ॥ द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु पर
वल्लिंगताप्रतिषेधोक्तव्य इति विशेष्यलिंगत्वं ॥ तेषां ज्ञानं तस्य निधिः सर्वार्थदृष्टेत्यर्थः ॥

कृतानतीन् कृतप्रणामान् अनुव्रजतोऽनुगच्छतः नभसि सीदंति गच्छंतीति नभःसदः सुरान् सत्सु द्विषेत्यादिना क्विप् ॥ निवर्त्य प्रतिप्रयाप्य सादिताः विनाशिताः दैत्यसंपदो ये न तस्य चक्रिणो हरेः मंहेद्रस्यालयो भवनं तद्वच्चारु पदं स्थानं समासदत् प्रापत् सीदसलुङ् इरापुषादि च्लेरङ् ॥ अत्र नतीनतीपदः पद मिति द्वयोर्व्यंजनयुग्मयोरसकृदाव

॥ पतत्पतंगप्रतिमस्तपोनिधिः पुरोस्य यावन्नभुवि व्यलीयत ॥
॥ गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः ॥१२॥

याच्चैकानुप्रासः अन्यत्र वृत्त्यनुप्रास इत्यनयोः संसृष्टिः ॥११॥ छ ॥ पतन् यः पतंगः सूर्यः संप्रति उपमान यस्य सः पतंगो पक्षिसूर्यौ चेत्यमरः ॥ तपोनिधिः मुनिः अस्य हरेः पुरोभुवि पुरःप्रदेशे यावत् न व्यलीयत नातिष्ठत् लिङ् गतौ विधि धातोर्दिवादिकात् कर्तरि लुङ् ॥ तावदच्युतो गिरेः शैलात् तडित्वानस्य संतीति तडित्वान् मेघः इव ॥ झय इति मतोर्मकारेस्य वकारः ॥ तसौ मत्वर्थे इति भसंज्ञामेकसंज्ञायामेकसंज्ञाधिकारेण पदत्वा अजत्वं ॥ उच्चै

कैः।उन्नतात्पीठात्जवेनोदतिष्ठत्।मुनिवरनारदस्य भूस्पर्शात्प्रागेव स्वयमुत्थितवान्
।ऊर्ध्वं प्राणा ह्युत्क्रामंति यूनः स्थविर आगते प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यत इ
ति शास्त्रमनुसरन्निति भावः।उदोनूर्ध्वकर्मणीति नियमात् इहोर्ध्वकर्मणि नात्मनेपदं प
तत्पतंग इत्यत्र पतंगस्य पतनासंभवादियमभूतोपमेत्याचार्यदंडि डि प्रभृतयो बभणुः

।।अथप्रयत्नोन्नमितानमत्फणैर्धृते कथंचित्फणिनांगणैरधः।।
।।न्यधायिषातामभिदेवकीसुतं सुतेन धातुश्चरणौ भुवस्तले।।१३।।

अत एवाप्रसिद्धस्योपमानत्वायोगादुत्प्रेक्षेत्याधुनिकालंकारिकाः।।१२।।७।। अथेति।।अ
थाच्युतोत्थानानंतरं धातुः सुतेन नारदेन प्रयत्नोन्नमिता न थापि मुनिपादन्यासभारात्
आनमंतः फणा येषां तैः फणिनां गणैः अधः अधःप्रदेशे कथंचिद्धृते भुवस्तले भूपृष्ठे अभि
देवकीसुतं लक्षणेनाभिप्रती आभिमुख्ये इति अव्ययीभावः।।चरणौ न्यधायिषातां
निहितौ।।दधातेः कर्मणि लुङ्।।स्यसिसीयुषडिसादिना चिण्वदिटि युक्।।अत्र

फणानांनमनोभ्रमनासंबधेपिमुनिगौरायततत्संबधाभिधादति॰शायोक्तिभेदः॥१३॥ ॥
तमिति॥आदिपुरुषःपुराणपुरुषः॥अन्येषामपिदृश्यतइतिनारीघः॥सकृच्छा॥अर्घंपूजां
अर्हतीत्यर्घ्यः॥दंडादिभ्योयः॥तेनारदं अर्घ्यार्थंद्रव्यंअर्घ्यंपादार्घंचेतियप्रत्ययः॥मू
ल्येपूजाविधानावर्घः षट्सुत्रिष्वर्घ्यमितिचामरः॥अर्घ्यमादिर्यस्यास्तया अर्घ्यादिकया

॥तमर्घ्यमर्घ्यादिकयादिपूरुषःसपर्ययासाधुसपर्यपूजत्॥
॥गृहानुपैतुंप्रणयादभीप्सवोभवंतिनापुण्यकृतांमनीषिणः॥ ॥१४॥

शेषांद्विभाषेतिकप्रत्ययः सपर्ययापूजया॥पूजानमस्यापचितिःसपर्यार्चार्हणाःसमाइ
त्यमरः॥पर्यपूजत् परिपूजितवान्॥णेोच जंतंकर्तव्यंपुलकंचेतदित्यर्थांतरन्यस्येति॥
गृहानिति॥मनसःईषणः मनीषिणःसंतः॥पृषोदरत्वात्साधुः॥अपुण्यकृतांपुण्यमकृत
वतां॥सुकर्मपापमंत्रपुण्येषुकृञइतिभूतेक्विप्॥गृहान्प्रणयादुपेतुंअभीप्सवो

प्राप्तुमिच्छवो॥ आप्नोतेः सनंतादुप्रत्ययः॥ संज्ञास्पृधामीचित्तीकारः॥ न भवंति किंतु पुण्यकृतामेव अतः कृच्छ्रलभ्याः संतः पूज्या इत्यर्थः॥ १४॥ नेति॥ मुत्थितौ वेतौ मुनी कृष्णौ जनः तुषारांजनयोः पर्वताविव यावत् नोदपश्यत् नेक्षितवान् तावत् चिर

॥ न यावदेतावुदपश्यदुत्थितौ जनस्तुषारांजनपर्वताविव॥
॥ स्वहस्तदत्ते मुनिमासने मुनिश्चिरंतनस्तावदभिन्यवीविशत्॥
॥१५॥

भवश्चिरंतनः पुराणो मुनिः कृष्णः पुरा किल भगवान् बदरिकारण्येनौ नारायणावतारेण तपसि स्थितवान् इति पुराणात् सायंचिरंतनमित्यादिना घप्रत्ययः॥ तुडागमश्च॥ स्वहस्तेन दत्ते आसने मुनिं नारदं अभिन्यवीविशत् स्वाभिमुख्येनोपवेशितवान्॥ विशतेर्णौ चङ्॥ १५॥ ॥ ॥ ॥ ॥

स्त १

महेति॥ महासामहानीलशिलापाः सिंहलद्वीपसंभवेंद्रनीलोत्पलस्य रुगिव रुग्यस्य तस्ये
त्युपमालंकारः॥ सींहलस्याकरोद्भूता महानीलास्तु ते स्मृता इति भगवानगस्त्यः॥ कंस
कृषः हरेः पुरोग्रे विष्टरे आसने वृक्षासनयोर्विष्टर इति षत्वं॥ निषेदिवान् उपविष्टवान्
॥ भाषायां सदवसस्रुव इति क्वसुः॥ स मुनिः॥ अभिसायं सायंकालाभिमुखं अव्य

१०

॥ महामहानीलशिलारुचः पुरो निषेदिवान्कंसकृषः स विष्टरे॥
॥ श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चंद्रमसो भिरामतां॥१६॥

१०

यीभावः॥ सायंकालस्यका[illegible]र्ष्णाल्लक्ष्योपमानत्वं॥ श्रितउदयाद्रिर्येन तस्य चंद्रम
स उच्चकैः अभिरामतां शोभामचूचुरत् चोरितवान् आपहृतवानित्यर्थः॥
चुर स्तेये णिश्रियादिना चङ्॥ अन्यस्यान्यधर्मसंबंधासंभवात् चंद्रमसो भिरामता
मिव अभिरामतामितिसौपम्यपर्यवसानात् असंभवद्वस्तुसंबंधरूपो निदर्शनाभेदः॥
स चोक्त[illegible]पमया अंगांगीभावेन संकीर्यते॥१६॥ ॥ ॥

विधायेति॥ यज्वनो विधिवदिष्टवंतः॥ यज्वा तु विधिनेष्टवानित्यमरः॥ सुजयोर्ङ्वनिप्॥ ते
षां प्रियो हरिः प्रसेदुषः प्रसन्नस्य सदेः क्वसुः रित्क्वसुः॥ तस्य मुनेः अपचितिं पूजां नमस्यापचितिः
पूजेत्यमरः॥ विधाय प्रकाममत्यंतं अप्रीयत प्रीतो भवत् प्रीङ् ओदैवादिकात् लङ्॥ कर्तरि
लुङ्॥ मुनिपूजायाः प्रीतिहेतुत्वे अर्थांतरं न्यस्यति॥ महानुभावाः महात्मानः आर्यान् पूज्या

॥विधाय तस्यापचितिं प्रसेदुषः प्रकाममप्रीयत यज्वनां प्रियः॥
॥ग्रहीतुमार्यान्परिचर्यया मुहुर्महानुभावा हि नितांतमर्थिनः॥
॥१७॥

न्॥ परिचर्यया मुहुर्ग्रहीतं वशीकर्तुं॥ ग्रहोलिटि दीर्घश्च॥ नितांतमर्थिनोऽभिलाषवतिनो
हि अर्थिनमर्थ्याभिलाषः स एषामस्तीति मत्वर्थीय निः नुलु णिनिः॥ अत्र भद्रतेक्तधितरति
वंशीयसिद्ध इति भाष्ये॥१७॥ ॥ ॥ ॥ ॥

अशेषेति॥अशेषतीर्थेभ्यः उपहृताः॥आहृताः॥तथा कमंडलोः पाणौ निधाय कमंडलोरुदकपा
त्राद् धृत्यर्थः कस्मात्सचतीत्यादिवत्तु क्रियातराक्षिप्तक्रियापेक्षया कमंडल्वोरपादानत्वं॥अ
स्त्री कमंडलुः कुंडीत्यमरः॥ऋषिणाभ्युदीरिताः॥क्षिप्ताः॥अतएवाघौघानां विध्वंसविधौ

॥अशेषतीर्थोपहृताः कमंडलोर्निधाय पाणावृषिणाभ्युदीरिताः॥
॥अघौघविध्वंसविधौ पटीयसीर्नतेन मूर्ध्ना हरिरग्रहीदपः॥१८॥

विनाशकरणे पटीयसीः समर्थतराः पटुशब्दादीयसुन्युगितश्चेति ङीप्॥अपो जला
नि हरिर्नतेन मूर्ध्ना अग्रहीत् स्वीकृतवान्॥ग्रहेर्लुङ्॥१८॥
स इति नवांबुदश्यामतनुः स हरिः मुनेरनुज्ञया कांचने कांचनविकारे वैकारिकोणप्रत्य

यः ।। यत्रासने न्यवीविशत् उपवेशितवान् ।। लुङि णिचश्च इत्यात्मनेपदं ।। शातइगुपधादनिद्यः
सः तदासनं तदा हर्म्यप्रवेशनसमये जंबूर्नीति फलवृक्षविशेषः । जंबूः सुरभिपत्रा च राजजंबू

।। स कांचने यत्र मुनेरनुज्ञया नवांबुदश्यामवपुर्न्यवीविशत् ।।
।। जिगाय जंबूजनितश्रियः श्रियं सुमेरुशृंगस्य तदा तदासनं ।।
।। ३१ ।।

र्महाफलेत्यभिधानरत्नमालायां ।। तया जनिता श्रीर्यस्य तथोक्तस्य भावितपुंस्कत्वात्
स्त्रिपुंवद्भावो नुमभावः ।। सुमेरुशृंगस्य श्रियं जिगाय तद्वद्बभावित्यर्थः ।। सत्र लिटो हे. रि
तिकु[illegible]तसं उपमानानुप्रासयोः संसृष्टिः ।। ३१ ।।

१२

सइति।तप्तंपुरपाकशो।धितंकार्तस्वरं।रुक्मंकार्त्तस्वरंजांबुनदमष्टापदो ऽस्त्रियामित्यम
रः।तद्वत् भास्वरंदीप्यमानंअंबरंयस्यसः।कठोरताराधिपस्य।पूर्णेंदोर्लांछनस्यछ

।सतप्तकार्तस्वरभास्वरांबरःकठोरताराधिपलांछनछविः।
।विदिद्युतेवाडवजातवेदसः।शिखाभिराश्लिष्टइवांभसांनिधिः।
।२०।

१२

विरिवछविर्यस्यसःरूपमानुबहुव्रीहिरुत्तरपदलोपश्च।सहरिर्वाडवजातवेदसोवड
वाग्नेःशिखाभिर्ज्वालाभिराश्लिष्टोंभसांनिधिरिवविदिद्युतेबभासे।२०। । ।

रथांगेति ॥ रथांगं चक्रं पाणौ यस्य तस्य हरेः प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति
पाणेः परनिपातः ॥ रोचिषां पटलेन संवलिता मिलिता ऋषित्विषो नक्तं रात्रौ सप्तम्यर्थे व्य

॥ रथांगपाणेः पटलेन रोचिषाम् ऋषित्विषः संवलिता विरेजिरे ॥
॥ चलत्पलाशांतरगोचरास्तरोस्तुषारमूर्तेरिव नक्तमंशवः ॥ २१

यं ॥ तरोश्चलतां पलाशानां पत्राणां अंतराणि विवराणि गोचरा आश्रया येषां ते तु
षारमूर्तेर्यस्य तस्येंदोरंशव इव विरेजिरे चकासिरे ॥ २१ ॥ ॥ ॥
प्रफुल्लेति ॥ प्रफुल्लतीति प्रफुल्लं फुल्ल विकसन इति धातोः पचाद्यजंतं फले निशायामनु

पत्सगात्तु फुल्लक्षीबकृशोल्लाघा इति नियमात्॥ प्रफुल्ल मित्येव त्ति क्षीरस्वामी॥ तापिच्छस्य
पुष्पं तापिच्छं फलेलुगिति तद्धितलुक् विहितं प्रसवे सर्वमिति नपुंसकत्वं॥ कालस्कंधस्तमालस्या
त्तापिच्छोपीत्यमरः॥ तेन सदृशैः प्रफुल्लतापिच्छनिभैः नित्यसमासत्वादस्वपदविग्रहः॥ अत
एवास्युरुत्तरपदे लमी॥ निभसंकाशनीकाशप्रतिकाशोपमादयः॥ इत्यमरः॥ सप्तसप्तच्छदाः

॥ प्रफुल्लतापिच्छनिभैरभीशुभिः शुभैश्च सप्तच्छदपांसुपांडुभिः॥
॥ परस्परेण च्छुरितामलच्छवी तदेकवर्णाविव तौ बभूवतुः॥ २२॥

पर्णानि पर्वसु यस्येति सप्तच्छदो वृक्षभेदः सप्तपर्णो विशालत्वक् शारदो विषमच्छद इत्यम
रः॥ संख्याशब्दस्य वृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिवत्कं माघशेषत्तापिच्छवत्॥ तस्य पुष्पा
णि सप्तच्छदानि तेषां पांसुवत् पांडुभिश्च शुभैरभीशुभिरन्योन्यरश्मिभिः अभीशुः प्रग्रहे
र[illegible]श्मावपि शाश्वतः॥ परस्परेण च्छुरिते रूषिते अमलच्छवी अन्योन्यकांती ययोस्तौ छव्यो

रभीश्नुनामवयवावयविभाषाङ्गेरनिर्देशः॥ततोहरिनारदौत्तदाएकवर्णाविवबभूवतुःउभ
यप्रभामत्लनरदुभयोरपिसवर्णगीर्णौगंगायमुनासंगमइवस्फटिकेंद्रनीलमणीप्रभामच्छ
न्नप्रायःकश्चिदेकोवर्णःप्रादुर्बभूवतभिमित्ताचेयंयोमेरेकवर्णत्वोत्प्रेक्षा॥२२॥युगांतेति
युगांन्तकालेप्रतिसंहृताआत्मन्युपसंहृताआत्मनोजीवायेनतस्यकैटभ[illegible]विषोहरेर्यस्यां

२।युंगांतकालप्रतिसंहृतात्मनोजगंतियस्यांसविकासमासत॥
॥तनौममुस्तत्रनकैटभद्विषस्तपोधनाभ्यागमसंभवामुदः॥२३॥

तनौर्जगंतिसविकाशांसविस्रंभंआसनअतिष्ठत्आसउपवेशनेलङ्॥तत्रतनौदेहे
तपोधनाभ्यागमेनसंभवंतीतिसंभावाःसंभूताःपचाद्यच्मुदःसंतोषाःनममुःअतिरि
च्यतेर्थःचतुर्दशभुवनपर्यापिरप्यंतनमिमावितिकविप्रौढोक्तिः।सिद्धातिशयेनस्वतःसिद्ध
स्याभेदेनाध्यवसितादतिशयोक्तिः॥साचमुदामंतःसंबधेप्यसंबधोक्त्यासंबधअसंब
रूपा॥२३॥ ॥ ॥ ॥ ॥

निदाघेति ॥ निदाघतुल्यं धाम यस्य तं तथोक्तं निदाघो ग्रीष्मकाले स्यादुष्णस्वेदांबुनोरपि इति विश्वः ॥ अर्कमिवाधिदीधितिमधिकंतेजसं मुनिं अभिलक्ष्य अभिरभागे इति लक्षणे कर्मप्रवच नियंसंज्ञा कर्मप्रवचनीययुक्ते द्वितिया ॥ मुदा विकासमुपेयुषी उपगते क्वसुप्रत्ययांतो निपातः अत एव अधिश्रिता प्राप्ता श्रीर्या भांति तथोक्ते इकोचि विभक्ताविति नुमागमः

१५

॥ निदाघधामानमिवाधिदीधितिं मुदा विकासं मुनिमभ्युपेयुषी ॥
॥ विलोचने बिभ्रदधिश्रितश्रिणी स पुंडरीकाक्ष इति स्फुटोऽभवत् ॥
॥२५॥

विलोचने बिभ्रत् ॥ नाभ्यस्ताच्छतुरिति नुमभावः ॥ सः हरिः पुंडरीकाक्ष इत्येवं स्फुटोऽभवत् ॥ सूर्यसंनिधाने सश्रीनिवसितेन पुंडरीकाक्षसाधर्म्यात् पुंडरीके इव अक्षिणी यस्येत्ययवयवार्थलाभात् पुंडरीकाक्ष इति वक्तव्यमन्वर्थसंज्ञोऽभूदित्यर्थः ॥ अबिभ्रत् स्फुटोऽभवदिति पदार्थहेतुकस्य काव्यलिंगस्य निदाघधामानमिवेत्युपमासापेक्षत्वादनयोरंगांगिभावेन संकरः ॥२५॥

१५

सितमिति ॥ अथो भयोरुपवेशनानंतरमच्युतः ॥ हेतुकर्त्ता विसारिभिः अभिक्ष्णं प्रसरद्भिः बहुलमभिक्ष्णाइति णिनिः द्विजावलिर्दंतपंक्तिः दंतविप्रांडजा द्विजाइत्यमरः ॥ सैव व्याजः कपटं यस्य स तद्रूपइत्यर्थः ॥ स चासौ निशाकरश्चेति तस्यांशुभिः किरणैः सितं स्वभावशुभ्र मुनेर्वपुः सौधं प्रासादमिव सुतरामत्यंतं अव्ययेदामूवक्तव्यः ॥ सितिम्ना धावल्येन प्रयोज्य

॥ सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाथलंभयन् ॥
॥ द्विजावलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः ॥
॥२५॥

कर्मत्वं भयन् व्यापारयन् जतिधवयन्नित्यर्थः लभेरगत्युपसर्जनि प्राप्त्यर्थत्वेन अगत्यर्थत्वात् गगति बुद्धिप्रत्यादिना अणिकर्त्तुरकर्मत्वं ॥ यथाहवामनः लभेर्गत्यर्थत्वं णिच्यणौकर्तुः कर्मत्वाकर्मत्वे इति प्राप्त्युपसर्जनगत्यर्थत्वेतु कर्ममेवेति रहस्यं गतिश्चेति नुमागमः ॥ शुचिस्मितां वाचं अवोचत् उक्तवान् ॥ स्मितपूर्वाभिभाषी च पूर्वभाषी च राघव इति न्यायादिति

या २

भावः ऋजोनच्चिर्वलुक्॥ वचउमित्युक्तमागमेगुणः॥ अत्रसौधमिवेत्युपमा पाःसितिम्नात्वंभयनिस्संबध
रूपत्रोयपानिः॥ द्विजावलिव्याजनिशाकरेति छल्यादिशब्दैरसत्यत्वप्रतिपादनस्त्तापन्हवस्यचमिथोनैर
पेक्षात्संसृष्टिः॥२५॥ ॥हरतीति॥ भवदीयदर्शनंशरीरभाजांन्नृणामित्यर्थः भजोण्विः कालत्रित
येभूतादिकालत्रितयेपियोग्यतांपात्रतांव्यनक्ति॥ गमयति कुतः संप्रतिदर्शन[illegible] कालेअघंपापंहरति

॥हरत्यघंसंप्रतिहेतुरेष्यतःशुभस्यपूर्वाचरितैःकृतंशुभैः॥
॥शरीरभाजांभवदीयदर्शनंव्यनक्तिकालत्रितयेपियोग्यतां॥
॥२६॥

एष्यतोभाविनःशुभस्यश्रेयसोहेतुः तथापूर्वाचरितैःप्रागनुष्ठितैःशुभैःसुकृतैःकृतंचैतत्केप्यपि
स्वकार्यत्वेनकारणेनचपुंस्तिसुकृतस्यमनायमवगमयत्तदर्शनंकस्यनभाव्यइत्तिभावः अत्रहरती
त्यादिवाक्यत्रयार्थस्यशरीरेत्यादिवाक्यार्थहेतुत्वात्समानावाक्यार्थहेतुकंकाव्यलिंगमलंकारः॥२६॥

जगतीत्ति॥ जगत्यप पर्याप्ता अपरिच्छिन्नाः सहस्रं भानवोंशवो यस्य तेन भानुना॥ अर्केण भा
नवोऽर्कस्तुरा शावस्तु भयत्रापीत्ति वैजयंती॥ पत्तमोनि सत्तुं न सम भावि नरेशकेकि भावेत्तु
इ॥ अविद्यमानमुत्तमं यस्मात्तनुत्तमं सर्वाधिकमदस्तो॥ मोमोहाखकमसंख्यतां गतैस्ते

॥ जगत्सपर्याप्तसहस्रभानुना न यन्नियंतुं सम भाविभानुना॥ प्रस॥
॥ स्यतेजोभिरसंख्यतां गतैरदस्त्वयानुन्नमनुत्तमं तमः॥ २७॥ छ॥

जोभिः प्रसह्य बलात्त्वया नुन्नं अतः श्चाघे रश्मिभवा नित्तिभावः॥ नुद च्छेदस्या
दिनाचिकल्प्यां भिप्रानत्त्व भावः अत्रोपमाङ्गानो मुनेराधिक्यप्रतिपादनाद्व्यतिरेकः
॥ २७॥ कृतइति॥ प्रजानां जनानां अपत्यानां च क्षेमकृत्त्वात् कुशलकारिणा॥ प्रजास्या
सततो जनस्त्सुमरः सुपात्रे योग्यपुरुषे कटकामहादिद्रव्यभाजने च निक्षेपेण निधानेन

निराकुलात्मना स्वस्थचित्तेन योग्यभाजनयोः पात्रमित्यमरः प्रजासृजा ब्रह्मणा पुत्रिण
न्यस्तं धनसंपदामिव श्रुतीनां वेदानां सदोपयोगे दानभोगाभ्यां व्ययेप्यक्षयः एकत्राम्ना
पदानादन्यत्रानांसाच्येति भावः गुरुपदेशसंप्रदायप्रवर्तक इतियावत् अन्यत्र महान् नि
धीयतेऽत्रेति निधिः निक्षेपः कृतः ॥ उपसर्गे घोः किः ॥ श्रुतिसंप्रदायद्वारा धर्माधर्मव्यव

॥ कृतः प्रजाक्षेमकृता प्रजासृजा सुपात्रनिक्षेपनिराकुलात्मना ॥
॥ सदोपयोगेऽपि गुरुस्त्वमक्षयो निधिः श्रुतीनां धनसंपदामिव ॥ २८ ॥

वस्थापकतया जगदुत्पत्तिहेतूनां भवादृशां दर्शनं कस्याश्लाघ्यमिति भावः अत्रराद्धमात्रसाधर्म्यात् ॥ श्रौतीयं प्रकृताप्रकृतविषयइत्याहुः ॥ २८ ॥ ७ ७ ॥ ॥

विलोकनेति॥ हे मुने निबर्हितांहसा अपहृतपानेन अत एव अमुना तव विलोकनेनै
व कृतार्थः कृतोस्मि तथाप्यहं गरीयसीरर्थवत्तराः द्विनचनविभज्येत्यादिना ईय्यसुन उ
गितश्चेति ङीप्॥ प्रियस्थिरेत्यादिना गुरोर्गरादेशः॥ गिरस्तव वाचोपि शुश्रूषुः श्रोतु

॥ विलोकनेनैव तवामुना मुने कृतः कृतार्थोस्मि निबर्हितांहसा॥
॥ तथापि शुश्रूषुरहं गरीयसीगिरोथवा श्रेयसि केन तृप्यते॥ २९॥

मिच्छुः अस्मि श्रृणोतेः सनंतादुप्रत्ययः नैच तद्दर्थेयाः अथवा त हीत्यर्थः अथवेति प
क्षांतरमसिध्योरिति गणव्याख्यानात् श्रेयसि विषये केन तृप्यते न केनापीत्यर्थः कृतार्थत
याइयत्ताभावादिति भावः॥ भावेल्लट्॥ २९॥ ॥ ॥ ॥

एवंप्रियंमुक्तासप्रत्यागमनप्रयोजनं विनयेन पृच्छति॥ गतस्पृहोपिति॥ गतस्पृहो विरक्तो
पित्वमागमनप्रयोजनं वदेति वक्तुं यया धृष्टतया व्यवसीयते उद्युज्यते स्मते भविष्णुः उदी
तमुत्पन्नं उक्तं ना आसनो ममगौरवेयेन सः गुरुः श्लाघ्य एषतवैवागमरवा नास्माकं

॥गतस्पृहोप्यागमनप्रयोजनं वदेति वक्तुं व्यवसीयते यया॥
॥तवेति नास्तास्मुदितास्मगौरवो गुरुस्तवैवागमएषधृष्टतां॥
॥३०॥

तां धृष्टतां तनोति भगवतो निस्पृहत्वे पि प्रेक्षावत्प्रवृत्तेः प्रयोजनव्याप्तासावका
रात्प्रश्न इति भावः॥३०॥ ॥ ॥ ॥ ॥

ग॥ नीति॥ इति ब्रुवंतं हरिं सव्रती मुनिः उवाच किमिति हे पुरुषोत्तम पुरुषेषूत्तम निर्द्धारणषष्टी
समासनिषेधः॥ त्वया इत्थं॥ तस्पृहापि इत्येवं न वाच्यं निःस्पृहस्यापि अत्र प्रयोजनसंभवा
दिति भावः॥ तदेवाह योगिनामपि त्वमेव साक्षात्करणीयः प्रत्यक्षीकर्त्तव्यः इत्यस्माद्धेतोरन्यद्गुरु

॥इति ब्रुवंतं तमुवाच सव्रती न वाच्यमित्थं पुरुषोत्तम त्वया॥ त्वमे॥
॥व साक्षात्करणीय इत्यतः किमस्ति कार्यं गुरु योगिनामपि॥
॥३२॥

कार्यं किमस्ति॥ न किंचिदित्यर्थः॥ तस्मान्न प्रयोजनांतरप्रश्नावकाश इति भावः॥३२॥
यदुक्तं योगिनामपि त्वमेव साक्षात्करणीय इति तदेव द्रढयति॥ उदीर्ण इति॥ उदीर्णः उद्रिक्तः रा
गः विषयाभिलाषः स एव प्रतिरोधकः प्रतिबंधकः पाटच्चरश्चौर यस्मिन्॥ प्रतिरोधिपरास्क

दीपाटच्चरमलिम्लुचा इत्यमरः अभीक्ष्णं अक्षुण्णतया अनभ्यस्तत्वेन अप्रतिहतत्वेन च जनैर
तिदुर्गमं मोक्षपथं अपवर्गमार्गं कांतारं चोपेयुषः प्राप्तवतः उपेयिवानाश्वाननूचानश्चेति
क्वसंतो निपातः ॥ मनस्विनः सुमनसः धीरस्य च प्रशंसायां विनिः त्वमेव निरपायः पुनराव
त्तिरहितः संश्रयः प्राप्तिर्यस्याः सा तथोक्ता न स पुनरावर्तत इति श्रुतेः ॥ अग्रभूमिः प्राप्यस्थानं

॥ उदीर्णरागप्रतिरोधकं जनैरभीक्ष्णमक्षुण्णतयातिदुर्गमं ॥ उपेयुषो ॥
॥ मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निरपायसंश्रया ॥ ३२ ॥ श्रीरामप्र ॥

॥ अग्रमालंबने प्राप्य इति विश्वः सोहमित्यादिश्रुतेः त्वत्प्राप्तेरेव मोक्षत्वादिति भावः ॥ तस्मा
न्मुमुक्षुणामपि त्वमेव साक्षात्करणीय इति सिद्धं ॥ तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽ
यनायेति श्रुतेः ॥ यथा कस्यचित्कुत्रचित्संकटाभिर्गमकेनचित्कांतारेणागतस्य किंचिन्निर्बा
धस्थानप्राप्तिरभयाय कल्प्यते तथा त्वमपि मुमुक्षोरिति ध्वनिः ॥ ३२ ॥

ननुप्रकृतिविवक्तिःपुरुषसाक्षात्कारान्मोक्षो नास्मत्साक्षात्कारादित्याशंक्य सोपि त्वमेवेत्या
ह॥ उदासितारमिति॥ पुराविदः पूर्वज्ञाः कपिलादयः त्वां निगृहीतमानसैः संनिरुद्धचित्तैः
योगिभिः आत्मन इति अध्यात्मं विभक्त्यर्थेऽव्ययीभावः अनश्चेति समासांत अच्॥ अध्यात्मं

॥ उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथंचन॥ बहिर्विकारं॥
॥ प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः॥२३॥ श्रीराम श्रीकृष्ण॥

दृक्ज्ञानं तया अध्यात्मदृशा प्रत्यग्दृष्ट्या कथंचन गृहीतं॥ साक्षात्कृतं केन रूपेण गृहीत
इत्यत आह॥ उदासितारं उदासीनं प्रकृतौ स्वार्थं प्रवृत्तायामपि स्वयमकृतत्वादस्पृष्टमि
त्यर्थः॥ आसेस्तृच्॥ विकारेभ्यो बहिर्बहिर्विकारं महदादिभ्यः पृथग्भूतमित्यर्थः॥ अप
रिबहिरंचवः पंचम्येत्यव्ययीभावः॥ किंच हितस्त्रैगुण्यात्मनो मूलकारणात् पृथक् भिन्नं॥ अ
प्रकृतिः पंचभूतेषु प्रधाने मूलकारणे इति यादवः॥ पुराभवं पुरातनं अनादिं सायंचिरंत्यादि
नाद्यप्रत्ययः॥ पुरुषं पुरुषपदवाच्यं विज्ञानघनं विदुर्वदंति॥ विरोलटोचयेति केचिदुत्सादरः

॥यथाहुः॥मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।षोडशकश्च विकारो
न प्रकृतिर्न विकृतिः पुरुषइति॥अजामेकां लोहितशुक्लकृष्णामित्यादिश्रुतेश्च सेगपित्वमे
चतत्वमस्यादिवाक्यैरेव श्रवणात्तस्मात्त्वमेव साक्षात्करणीयइति सुष्ठूक्तमिति भावः
॥३३॥

॥निवेशयामासिथहेलयोद्धृतं फणाभृतां छादनमेकमोकसः॥जगत्त्रयैकस्थप॥
॥तिस्त्वमुच्चैकैरहीश्वरस्तम्भशिरःसुभूतलं॥३४॥श्रीमोरयाप्रा।श्रीसांब

॥१७॥ एवं भगवन्तो निर्गुणस्वरूपमुक्त्वा संप्रति भक्तानुग्रहोपयोगितया सगुणमाश्रित्य षड्भिः स्तौति॥नि ॥१७॥
वेशयामासिथेति॥जगत्त्रयस्य एकस्थपतिरेकाधिपतिः एकशब्दस्यैव चस्य पतिं पुनः स्थ
पत्यधिपतौ तिष्ठिबृहस्पतिसविचयइति विश्वः॥त्वं हेलयोद्धृतं वराहावतारइति भा
वः॥फणाभृतामोकसः आश्रयस्य सद्मनश्च ओकः सद्मनि चाश्रयइति विश्वः एकं स्थो
छादनं आवरणभूतं लघु श्वैकं भूतेषु अहीश्वरः शेषस्तम्भः तस्य शिरस्सु मूर्धस्वपे
षु सर्वेष्वपि भावः॥निवेशयामासिथ निहितवानसि॥न विशतेर्ण्यन्तात् लिट्॥कृञ्चानु

प्रपुज्यते लिङ्टीसस्तेनुप्रयोगः॥अत्राश्लिष्टाश्लिष्टरूपयोर्हेतुर्हेतुमद्भावात् श्लिष्टपरंअं
कंपरिरूपकं ॥३४॥ अनन्येति न विद्यते अन्यो गुरुर्यस्याः तस्याः अनन्यगुर्व्याः इयसनीका
रांतः पाठः॥ समासाश्रागीरनद्युत्त श्चेतिकप्रसंगः॥पश्चात्वनुपसर्जनादुकारादोतो
गुणवचनादिति ङीन प्राप्नोति ङीङ्श्चेति वानदीत्वादापनद्याइडागमः॥केचित्तु समासांतो स्व ४

॥अनन्यगुर्व्यास्तवकेनकेवलंपुराणमूर्तेर्महिमावगम्यते ॥मनुष्यजन्मा॥
॥पिसुरासुरान्गुणैर्भवान्भवोच्छेदकरैकरोत्पधः॥३५॥श्रीसोबप्रा॥

विधिरनित्यइतिकथंवारयंति॥तस्याः सर्वोत्तरायास्तव पुराणमूर्तेः केवलममानुषस्वरूपे
स्पैव॥केवलः कृत्स्न एकस्याकेवलश्चावधारणइतिश्चाश्वतः॥महिमाकेनावगम्यते न के
नापीत्यर्थः॥कुतः मनुष्याज्जन्मयस्यसः मनुष्यजन्मापि भवान्॥अवजाबहुव्रीहिर्व्याधि
करणोजन्माद्युत्तरपदइतिवामनः॥भवोच्छेदकैरैः संसारनिवर्त्तकैः गुणैर्ज्ञानादिभिः
सुरासुरान्सुरासुर निरोधस्यकार्येपिधिलेनाशाश्वांतिकताद्योषांचविरोधः शाश्वति

मा॰स॰

का॰सू॰

कद्लिनद्वद्वैकवद्भावइत्याहुः॥अधःकरोतीशेषप्रथमपुरुषःभवच्छब्दस्ययुष्मदस्मदन्यत्वेन
शेषत्वादितिमानुषएवंतेमहिमादुरवगाहःअमानुषस्यकिमिति॥तात्पर्यार्थःसरूव्यं
जनयुग्मावृत्याछेकानुप्रासः॥३५॥त्वंविति॥त्वमतिभारेणदुर्जनरूपेणभंगुरांस्वयं
भज्यमानं॥भंजभासमिदोघुरच्॥भिदुरादयःकर्मकर्त्तरीतिवामनःअमुंभुवमित्यर्थः

॥लघूकरिष्यन्नतिभारभंगुराममुंकिलत्वंत्रिदिवादवातरः॥उदूढलो॥
॥कत्रितयेनसांप्रतंगुरुर्धरित्रीक्रियतेतरांत्वया॥३६॥श्रीमार्त्तंडप्रा॥

॥२०॥

॥२०॥

॥लघूकरिष्यन्निर्भरांकरिष्यन्किल॥अभूततद्भावेच्विः॥च्वौचेतिदीर्घः॥त्रिदिवाद्योःत्रि
दिवःस्वर्गस्तस्मात्घञर्थेकविधानंचत्ति॥विधेयसंख्याशब्दस्यपूरणार्थत्वंत्रिभागवत्॥अ
वातरःअवतीर्णोसिसांप्रतंसंप्रतिउदूढलोकत्रितयेनकुक्षौविभृतिशेषः॥त्वयाधरित्रीगुरुः
भू[illegible]ज्याभारवतीच॥क्रियततरामतिशयेनक्रियते॥तिङश्चेतितरप्किमेत्तिङव्यय

गा॥धाम्बइत्यप्रकर्षइत्याम्प्रत्ययः॥लघूकर्त्तागुरूकर्त्तेति विरोधाभासोऽलंकारः॥आभासत्वेविरोधस्यविरोधाभासउच्यतेइतिलक्षणात्॥३६॥निजौजसेति॥निजौजसास्वतेजसाजगद्भ्योद्रुह्यंतीतिजगद्द्रुहः द्रुहःकंसादयःसत्सूद्विषेत्यादिनाक्विप्॥तेषामुज्जासयितुंतान्हंतुमित्यर्थः॥जासिनिप्रहणेत्यादिनाकर्मणिशेषेषष्ठी॥जसुहिंसायां॥

॥निजौजसोज्जासयितुंजगद्द्रुहामुपाजिहीथानमहीतलंयदि॥समा॥
॥हितैरप्यनिरूपितस्ततःपदंदृशःस्याःकथमीशमादृशां॥३७॥श्रीलक्ष्मिप्रा॥

मितित्विचुरादिः॥मोहिनत्वंनोपाजिहीथाः॥यदिनावततर्थ्येत्॥आङ्हाङ्गतौ॥लिङिथासततस्त्वंहिसमाहितैःसमाधिनिष्ठैःअपिसकर्मकादप्याशितादिवदविवक्षितेकर्मणिकर्त्तरिक्तःअथवासमाहितैश्चित्तैःविभक्तधेनुवद्विभक्तभ्रातरइतिवदुत्तरपदलोपोद्रष्टव्यः॥गम्यमानार्थस्याप्रयोगएवलोपइतिकैयटः॥अनिरूपितोऽदृष्टस्तस्मीश

मादृशांचर्मचक्षुषामितिभावः बिनयेति रियंदृशोदृष्टेः पदं गोचरः कथंस्याः न कथंचिदि
त्यर्थः तस्मात्त्वत्साक्षात्कारणएव आगमनमितिभावः ॥३७॥ ननु कोसौ निर्बंधो यन्मम
मैनायं दुष्टनिग्रहाधिकारइत्याशंक्याऽनन्यसाध्यत्वादित्याह ॥उपप्लुतमिति ॥ विश्वंबि
भर्तीति विश्वंभरः ॥ तत्संबुद्धौहे विश्वंभर विश्वत्रातः संज्ञायां भृतवृजीत्यादिना खचर

॥उपप्लुतंपातुमदोमदोद्धतैस्त्वमेव विश्वंभर विश्वमीशिषे ॥ ऋतेरवेः ॥
॥क्षालयितुंक्षमेतकः क्षपातमस्कांडमलीमसंनभः ॥३८॥ शारउन्धर

प्रत्ययेमुमागमः मदोद्धतैः कंसादिभिः उपप्लुतं पीडितं अदः विश्वं पातुं त्वमेव ईशिषे शक्नो
सि विश्वंभरत्वादितिभावः ॥ ईशऐश्वर्ये ल्लिट् थास् ॥ अत्रैनैव धर्म्येण दृष्टांतमाह ॥ क्षपाया
स्तमः कांडैः तमोवर्गैः कांडोस्त्री दंडबाणार्ववर्गावसरवारिषु इत्यमरः कस्कादिषु चेति
विसर्जनीयस्य सत्वं ॥ मलीमसं मलीनं मलिमसं तु मलिनं कच्चरं मलदूषितमित्यमरः
ज्योत्स्नातमिस्रेत्यादिना मत्वर्थीयो निपातः नभः क्षालयितुं रवेः ऋते रविं विना अन्यारा
दितरर्तेति पंचमी ॥ कः क्षमेत शक्नुयान्न कोपीत्यर्थः अत्रवाक्यद्वये समानधर्मस्यैक

कस्य विशेषस्योपमेयत्वेनेति शब्दद्वयेन वस्तुप्रतिवस्तुभावेन निर्देशाच्चाप्यतिरेकमुखत्वाद्वै
धर्म्यस्य प्रतिवस्तूपमालंकारः ॥ तदुक्तं सर्वं वाक्यार्थगतत्वेन सामान्यस्य वाक्यद्वये पृथक्
निर्देशे प्रतिवस्तूपमालंकारः ॥ ३८ ॥ करोतीति ॥ किंच जनो मृगाणामिव कंसादिमहीभृ
तां वधा[illegible]लोः स्तवं स्तोत्रं ॥ स्तव स्तोत्रं स्तुतिर्नुतिरित्यमरः ॥ करोतीति यत्तु हे हरे [illegible] सिं

॥ करोति कंसादिमहीभृतां वधाज्जनो मृगाणामिव यत्तव स्तवं ॥ हरे हिरण्याक्षपु ।
॥ रःसुरासुरद्विषद्विषः प्रसुतस्य तिरस्क्रिया ॥ ३९ ॥ श्रीनारायण श्रीनासुख

हे इति गम्यते सा स्तुतिस्तिरस्क्रिया हिरण्याक्षपुरःसराः हिरण्याक्षप्रभृतयः असुरास्त एव द्विषः
तेषां द्विषा हन्तुरित्यर्थः ॥ तस्य तव प्रसूतेन परीक्षेन प्रस्तुतेन तत्कृतं वैपरीत्य इति गण व्याख्या
ने ॥ तिरस्क्रिया अवमानः य दिति सामान्ये नपुंसकं सेति विधेयलिंगं गजघातिनः सिं
हस्य मृगवधवर्णनमिव महासुरहन्तुस्तवकं सादिक्ष्मभुजन्रपवधोद्घाटनं तिरस्कार एवेत्य

र्थः॥ अत्रासुरद्विपानां हरिवद्वारिरिति श्लिष्टपरंपरितरूपकं मगाणामिवेत्युपमाया॥ अंगांगीभावेन संकीर्यन्ते॥३९॥ एवं स्तुत्वा देवमभिमुखीकृत्य गमनप्रयोजनं वक्तुमुपक्रमते॥ प्रवृत्त इत्ति॥ त्वं उज्झितश्रमः मुक्तश्रमः सन् क्रमेण भुवनानि द्विषंतीति भुवनद्विषः दुष्टाः तेषां पेष्टुं तान् हंतुमित्यर्थः। जासिनिप्रहणनाटक्राथपिषां हिंसायामिति कर्मणि शेषे षष्ठी॥

॥प्रवृत्त एव स्वयमुज्झितश्रमः क्रमेण पेष्टुं भुवनद्विषामसि॥ तथापि॥
॥वाचालतया युनक्ति मां मिथस्त्वदाभाषणलोलुपं मनः॥४०॥ श्रीश्रा

षे षष्ठी॥ स्वयमपरप्रेरित एव प्रवृत्तोसि॥ एवं तर्हि पिष्टपेषणं मास्मा कारीति चेत्तत्राह॥ तथापि स्वत प्रवृत्तोपि मिथो रहसि त्वदाभाषणे त्वया सह संभाषणे लोलुपं लुब्धं लुब्धोभिलाषकस्तृष्णक् समे लोलुपलोलुभावित्यमरः॥ मनो मां वाचालतया सह युनक्ति वाचालं करोतीत्यर्थः॥ वाचो बह्व्योस्य संतीति वाचालः आलजाटचौ बहुभाषिणि इत्यालच्॥ स्याज्जल्पकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् इत्यमरः॥४०॥

अथ स्ववाक्यश्रवणं सहेतुकं प्रार्थयते ॥ तदिति ॥ तत्तस्मादिंद्रमुपगतैः उपेंद्रः इंद्रावरजः अ
त एव इंद्रसंदिष्टं श्रोतव्यमिति भावः ॥ किंच विश्वस्मै जनाय हितं विश्वजनीनं आत्मन्वि
श्वजनभोगोत्तरपदात्खः ॥ यद्वचः क्षणं ननु चिरं मयोच्यते तद्वचो अहिद्विषो वृत्रघ्नः ॥ स
र्वै वज्रासुरेष्वहीरति वैजयंती ॥ समस्तकार्येषु धुर्यतां धुरंधुरं संगतेन अतोपि भवता निशम्य

॥ तदिंद्रसंदिष्टमुपेंद्र यद्वचः क्षणंमया विश्वजनीनमुच्यते ॥ समस्तका॥
॥र्येषु गतेन धुर्यतामहिद्विषस्तद्भवता निशम्यतां ॥ ४१ ॥ श्रीव्यंकटेश ॥

म्यतां श्रूयतां प्रार्थनायां लोट् ॥ धुरं वहतीति धुर्यः ॥ धुरो यड्ढकौ इति यप्रत्ययः ॥ स्फुटमत्र
पदार्थहेतुकं काव्यलिंगमलंकारः ॥ ४१ ॥ अथ शिशुपालो हंतव्य इति वक्तुं तस्यावश्यवध्यतेऽ
नन्यवध्यत्वज्ञापनौपायिकतया अस्यैवाद्भुतस्य प्रकटनार्थं जन्मांतरवृत्तांतं तावदुद्घाटयति
॥ अभूदिति ॥ प्रतिपक्षात्त्रासाज्जन्म यासां तासां भियामभूमिरविषयो निर्भिक इत्यर्थः
॥ तपनद्युतिः सूर्यप्रतापो दितेः तनुजो दैत्योऽभूत् ॥ कोसावत आह ॥ हरेः इंद्रस्य इंद्रराद्वा

शि

थनिषुदनं इदंतीनिरिंद्रः॥ इति परमैश्वर्ये रुजेंद्रेत्यादिना रन्प्रत्ययांत औणादिको निपातः॥
तस्येंद्रशब्दस्येंद्रेति संज्ञापरस्यार्थः परमैश्वर्यलक्षणः तस्य निषूदनं निवर्त्तकं कर्त्तरि ल्युट् हरे
रैश्वर्यहर्त्तारिमित्यर्थः यं दैत्यं हिरण्यशब्दपूर्वं कशिपुं प्रचक्षते॥ हिरण्यकशिपुरित्यर्थः॥
अत्र हिरण्यशब्दपूर्वकत्वं कशिपुशब्दस्यैव न तु संज्ञिनस्तदर्थे, निशब्दपरस्य कशिपुशब्द स्ये ४

॥ अभूदभूमिः प्रतिपक्षजन्मनां भियां तनूजस्तपनद्युतिर्दितेः॥ यमिं॥
॥द्रशब्दार्थनिषूदनं हरेर्हिरण्यपूर्वंकशिपुंप्रचक्षते॥ ४२॥ श्रीम्हालसाकांत

दस्यार्थगतत्वेनाप्रयोज्यप्रयोगादवाच्यवचनार्थीरव्यं दोषमाहुः यदवाच्यवचनं हिनत्व
दिति समाधानं एवं विधविषयशब्दपरेणाप्यर्थलक्षणेति कथं चित्संपाद्यमिसक्रमेस्मा
भिरेव पूर्वं गिरिंत इत्यनुरूपपदमस्मे वेदमन्त्रादिरेरोसे वतद्व्याख्यानानसरे सं जिन
न्यां घंटापथे च निरोषश्चात्र यं दैत्यं उ हिरण्यहिरण्यपर्वकशिपुं हिरण्यशब्दपूर्वकशिपु
शब्दं प्रचक्षते॥ संज्ञातेन प्रयुक्तं॥ ४२॥ ॥श्रीभार्गवराम श्रीदाशरथीराम

समत्सरेणेति ॥ समत्सरेण सवैरेण अस्पती ससुरः असेरौ[illegible]न् असुर इति नाम्नैमनश्विरा र
य चिरकालेन चिराय चिररात्राय चिरस्याद्याः श्चिरार्थकाः इत्यमरः ॥ प्रथमाभिधेयतां उ
पेयुषा अन्वर्थतया मुख्यार्थतां गतेन नत्तरस्विना बलवता ॥ त्तरसी बलं रहसीति विश्वः ॥ येन
हिरण्यकशिपुना दिविसीदंनी निघुसहां देवानां मनस्सु भयस्य पूर्वावतारः ॥ प्रथमप्रवेशः ॥ के

॥ समत्सरेणासुर इत्युपेयुषा चिराय नाम्नः प्रथमाभिधेयतां ॥ भयस्य ॥
॥ पूर्वावितरस्तरस्विना मनस्सु येन द्युसदां न्यधीयत ॥ ४२ ॥ श्रीपांडुरंग ॥ श्री ॥

दोरप न्यधीयत निहृतः धियः कर्मणि लङ् अस्मादेव देवानां भयस्योत्पत्तिरभूदित्यर्थः ॥
॥ ४३ ॥ दिशामिति ॥ श्रियः संपदः यत्नो यदेत्यर्थः ॥ दिशां अधीशान् दिक्पतीन् निश्चितु
रः सुरो निंद्रयमवरुणकुबेरान् अपास्य विहायतं हिरण्यकशिपुं रागाद्हृताः रागहृष्टाः

मा॰का॰

स॰स॰१

ससः न तु बलादिति भावः ॥ शिषेविरे यतो विरक्ता याः श्रिय इति भावः ॥ तत आरभ्य
तदाप्रभृति अयशः करोतीत्ययशस्करं दुःकिर्तिहेतुकमित्यर्थः ॥ द्वौ हेतुताद्धि
त्यानुलोम्यं श्रितीति लिट् प्रत्ययः ॥ अतः कृकमिसादिनो विसर्जनीयस्य सत्वं ॥ उच्चैः प्र
चुरं चला अस्थिराः इति प्रवादं जनवादमवापुः दिगीशानामपि सर्वस्वहारिण्य ॥ मि

॥२५॥

॥ दिशामधीशांश्चतुरो यतः सुरानपास्य तं रागहृताः सिषेविरे ॥ अतो ॥
॥ पुरारभ्य ललनश्चला इति प्रवादमुच्चैरयशस्करं श्रियः ॥५५॥ श्रीगंगाधर

तिलरोद्धसस्यपराकाष्टा इति भावः ॥५४॥ पुराणीति ॥ किंच नाकिनां सुराणां गणैः
यं हिरण्यकशिपुमारांभ्य बाधकत्वेनोत्सेक्ष्यसः कालः आदिर्यस्मिन्तत्तदारित्त
दाप्रभृति स्वरूपशोभैवैकफलं मुख्यप्रयोजनं येषां पुरादीनां तानि तथोक्तानि प्रा
गीदृगसाध्यशात्रवाभावादिति भावः ॥ नपुंसकमनपुंसकेनैकवच्चान्यतरस्यास्या

॥२५॥

मितिन पुंसवैककशेषः ॥ पुराणिदुर्गाणिप्राकारपरिखादिरगम्यानिचक्रि
रे सुदुरोरूपसंख्यानमितिगमेर्डः ॥ आयुधंचनिशातं निशितंचक्रे ॥ शो
तनूकरणे ॥ इतिधातोःक्तः शाच्छोरन्यतरस्यामितिइत्त्वविकल्पात्पक्षेआ

॥ पुराणिदुर्गाणिनिशातमायुधंबलानिशूराणिघनाश्चकंचुकाः ॥
॥ स्वरूपशोभैकफलानिनाकिनांगणैर्यमाशंक्यतदादिचक्रिरे ॥ ४५ ॥

त्वं ॥ बलानिसैन्यानिशूराणिशौर्यवंतिचक्रिरे ॥ संपादितानिकंकी
वारबाणालोहचर्माणिइत्यर्थः ॥ कंचुकोवारबाणोस्त्रीत्यमरः ॥ घ
नाः दुर्भेदाश्चक्रिरे ॥ इत्थंनित्यसंनद्धाजागर्तीत्यर्थः ॥ ४५ ॥ सइति ॥
अन्येषुभुवनेषु भुवनांतरेषुसुप्सुपेतिसमासः ॥ संचरिष्णुः

संचरणशीलः।।अलंकृञ्इत्यादिनाचरेरिष्णुचप्रत्ययः।।श्रियं।आश्रयःसहिरण्य
कशिपुःयदृच्छयास्वैरवृत्त्यायदृच्छास्वैरवृत्तेत्यमरः।।यादिशंअशिश्रयत्लुङ्णि
श्रीत्यादिनाचङि।द्विर्भावःइपउन्देशाः।।मुकुटोपलेषुमौलिरत्नेषुस्खलन्तःकरायेषां
तैःशिरसिबद्धांजलिभिरित्यर्थः।।उपलःप्रस्तररत्नइतिविश्वः।।तिस्रोदशा

।।ससंचरिष्णुर्भुवनांतरेषुयांयदृच्छयाशिश्रियदाश्रयःश्रियां।।
।।अकारितस्यैमुकुटोपलस्खलत्करैस्त्रिसंध्यंत्रिदशैर्दिशेनमः।।७६

अवस्थाबाल्यकौमारयौवनानिजन्मसत्तावृद्धयोऽएषांतैःत्रिदशैःदेवैःयुस्या०
त्रिंशत्परिमाणंयेषामितिबहुव्रीहौसंख्ययेऽव्ययबहुगणातइतिडच्।।तिस्रःसंध्याः
समाहृताःत्रिसंध्यंतद्धितार्थेत्यादिनासमाहारेद्विगुःद्विगुरेकवचनंवाटा
वंतइतिपक्षेनपुंसकत्वंअत्यंतसंयोगेद्वितीया।।तस्यैदिशेनमःनमःस्वस्ति
स्वाहेत्यादिनाचतुर्थीनिमोनमः।स्कारोऽकारि।।कृञःकर्मणिलुङ्।चिण्भावक

र्मणोरातिश्चेणवृद्धिः ॥ ४६ ॥ अथसोपित्वयैवसंहृत इत्याह ॥ सटेति ॥ हेहरसिं
हनासिंह इवेत्युपमितसमासः ॥ नाचासौसिंहश्चेत्यपिप्रस्तावात्नाचा
त्रजाति सांकर्येणोभयासिद्धिश्च रवेऽब्रह्माण्डउभयोरपिनृत्वासिंहत्वयोमा

॥ सटाच्छटाभिन्नघनेनबिभ्रतानृसिंहसैंहीमतनुंतनुंत्वया ॥ स
॥ मुग्धकांतास्तनसंगभंगुरैरुरोविदारंप्रतिचस्करेनखैः ॥ ४७ ॥

सारोपाधिकत्वेनासंकर्यात् ॥ सिंहस्येमांसैंहीअतनुंअनल्पांतनुंकायं
बिभ्रतान्टसिंहावतारभाजाइत्यर्थः ॥ अतएवसटाच्छटाभिःकेसर
समूहैः ॥ भिन्नाःघनाःयेनतेनाभ्रंकषविग्रहत्वादितिभावः ॥ सटाच्छटा
केसरयोःतनुःकायेकृशोल्पेचेतिविश्वः ॥ वयःसंदैत्यमुग्धानबौमु

मा०का०स०

स० १

ग्यः सौम्येन वेमरूटइत्निबेजयंति॥ यौ कांतास्तनौ तयोः संगेनातिभंगुरैः नखै
रुरो विदार्य उरो विदारं परिक्लिश्यमाने चेति णमुल् प्रत्ययः॥ प्रतिचस्करे हतः किरतेः
कर्मणि लिट्॥ कुच्छुस्यनामिति गुणः॥ हिंसायां प्रतेश्चेति सुडागमः॥ वज्रकठिनो
पि नखैर्विदारितः इत्यहो अमनसगोचर महिमस्ते किमतिभावः॥४७॥ अथास्या

॥२६॥

॥विनोद[illegible]मिच्छन्नथदर्पजन्मनो रणेन कंड्वा स्त्रिदशैः समं पुनः॥सरावा॥
॥णो नाम निकामभीषणं बभूव रक्षः क्षतरक्षणं दिवः॥४८॥ श्रीविष्णु

नंतरजन्मचेष्टितान्याचष्टे॥ विनोदमिति॥ अथ स हिरण्यकशिपुः पुनर्भूयोपि त्रि
दशैः समं सह॥ साकं सार्द्धं समं सहेत्यमरः॥ रणेन दर्पादितः सा राज्जन्म यस्यास्तस्याः
कंड्वाः भुजकंड्वेति विनोदमपनोदमिच्छन्॥ प्रागभवन स्वक्षे नैस्तदपनोदाभावादित्य
र्थः॥ दिवः स्वर्गस्य क्षतं रक्षणं रक्षा येन तत्क्षतसुरक्षणमित्यर्थः॥ सापेक्षत्वेपि ग
मकत्वात्समासः॥ अनेन देवसर्वस्वापहारित्वमुक्तं भीषयतेनरतिभीषणं नंद्या

॥२६॥

दित्वात्खुप्रत्ययः ॥ निकामं भीषणं सुप्सुपेति समासः ॥ रावणो नाम रावण इति प्र
सिद्धं ॥ रक्षोबभूव ॥ राक्षसस्य योनौ जात इत्यर्थः ॥ विश्रवसोऽपत्यं पुमान् रावणः इति विग्र
हः ॥ तस्यापत्यमिति अण् विश्रवसो विश्रवणरवणौ विति प्रकृते रवणादेशः पौराणि
कास्तु रावयतीति रावण इति व्युत्पादयन्ति ॥ तदुक्तं उत्तरकांडे ॥ यस्माल्लोकत्रयं चैतद्रावि
भयमागतं तस्मात्त्वं रावणो नाम नाम्ना ॥ वीरो भविष्यसि ॥ रौत्तिण्यंतात्कर्तरि ल्युट् ॥ रा
वणरक्षसयोर्नियतलिंगत्वाद्विशेष्यविशेषणभावेऽपि स्वलिंगता ॥ ४८ ॥ अस्यो

॥ प्रभुर्बुभूषुर्भुवनत्रयस्य यः शिरोऽतिरागाद्दशमं चिकर्तिषुः ॥ अनर्कयद्विघ्न ॥
॥ मिविष्टसाहसः प्रसादमिच्छासदृशं पिनाकिनः ॥ ४९ ॥

इत्यमष्टदशश्लोकैकव्यन्विष्टे ॥ प्रभुरिति ॥ यो रावणः भुवनत्रयस्य प्रभुः स्वामी बुभू
षुर्भवितुमिच्छुः भवतेः सनंतादुः प्रत्ययः ॥ अतिरागादत्युत्साहान्नतु फलविल
म्बिन निर्वेदादिति भावः ॥ दशमं शिरः चिकर्तिषुः कर्तितुमिच्छुः छेत्तुमीच्छेरनद

तिधालोः सनंताद्भयः ॥ इष्टसाहसः अंतरंगे च सदृशां स्वेच्छानुरूपं पिनाकिनः प्र
सादं वरं विघ्नमिवातर्कयत् ॥ उत्क्षिप्तवानिति परमसाहसिकोक्तिः ॥ इत आरभ्य श्लो
कषट्केऽपि यच्छब्दस्य स रावणो नाम रक्षो बभूवेति पूर्वेणान्वयः ॥ रंगराजस्तु न चक्र
मस्याक्रमताधिकं घरमिति उपरिष्टादन्वयमित्याहुः ॥ तदसत्तु गुणानां च परार्थत्वा
दिति न्यायादारुण्यादिवत्प्रत्येकं प्रधानानां मिथः संबधायोगादित्यलं शाखाचंक्र
मणेन ॥ पुरा किल रावणः काम्यकर्मणि प्रजापतिं प्रीणनाय नव शिरांस्यग्नौ हुत्वा दशमा

॥ सतु क्षिपन्यः पृथवीभृतां वरं वरप्रदानस्य चकार शूलिन ॥ त्रसत्तुषाराद्रि ॥
॥ सुताससंभ्रमस्वयंग्रहाश्लेषसुखेन निष्क्रियं ॥ ५० ॥ · रंभे संतुष्टात्तस्मात्त्रैलो

क्याधिपत्यं वव्रे इत्युत्तरकांडकथात्रानुसंधेया ॥ ४९ ॥ अथ कैलासोत्क्षेपवृत्तांत
माह ॥ सतु क्षिपन्निति ॥ यो रावणः पृथिवीभृतां वरं कैलासं समुत्क्षिपन् दर्पादिति
शेषः शूलिनो वरप्रदानस्य पूर्वोक्तस्य त्रसंत्याः शैलचलनेन बिभ्यत्यास्तुषारा
द्रिसुतायाः पार्वत्याः ससंभ्रमो यः स्वयंग्रहः प्रियप्रार्थनां विनाकंठग्रहणं सुसुपसुप

तिसमासः॥ तेन आश्लेषस्तेन यत्सुखं तेन त्रैलोक्याधिपत्यसुखादुत्कृष्टेनेति
भावः॥ निष्क्रयं प्रत्युपकार निर्गतिं चकार निष्क्रयो बुद्धियोगे स्यात्सामर्थ्ये निर्गतौ
चेति वैजयंति॥ यद्वा क्रयणं चकार क्रयव्यवहारेण याश्चादैन्यदोषं ममार्जेत्यर्थः॥
अत्र सुखरत्नप्रदानयोर्विनिमयात्परिवृत्तिरलंकारः॥५०॥ पुरीमिति॥ बलिर्बल
वान्यो रावणः नमुचिद्विषा इंद्रेण विगृह्य विरुध्य। पुरीममरावतीमवस्कंद अवरु

॥ पुरीमवस्कंद लुनीहि नंदनं मुषाण रत्नानि हरामरांगनाः॥ विगृह्य च॥
॥ क्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः॥५१॥ श्रीअमरेश्वर

रोध नंदनं तद्वनं लुनीहि चिच्छेद ईहत्यघोरितिकारः॥ रत्नानि श्रेष्ठवस्तूनि मणीन्वा
रत्नं श्रेष्ठे मणावपीति विश्वः॥ मुषाण मुमोष स्तेयेहल्लश्वः रागनास्त्राविनिशानजारदराः
॥ अमरांगना हरज हार सर्वत्र पौनःपुन्येनेत्यर्थः॥ इत्थं अनेन प्रकारेण अहनि च दि
वा च अहर्दिवं अहन्यहनीत्यर्थः॥ अचतुरादिना सप्तम्यर्थे द्वयोर्द्वंद्वसमासांत

निपातः॥ दिवः स्वर्गस्यास्वास्थ्यं उपद्रवं चक्रे अभ्रावस्कंदे स्यादौ क्रियासमभिहारे लो
ट्लोटो हि स्वौ वा च तध्वमो॥ स्मृ तु ह्योः समुच्चये ऽन्यतरस्यामिति विकल्पेन कालसामा
न्ये लमात्र्यो देशो लोट् तस्य यथा प्रग्रहं सर्वा तिङां देशो हिस्वौ च प्रकरणादिना त्वर्थ वि
शेषावसानं अतो हेरिति यथा प्रयोगं हि लुक् पौनःपुण्यं भृशार्थे वा क्रियासमभिहा
रः॥ अवस्कंदनादिक्रियाविशेषाणां समुच्चयः॥ क्रियासमभिहारस्तत्सामान्यस्य

॥सलीलयातानि न भर्तुरभ्रमोर्न चित्रमुच्चैःश्रवसः पदक्रमं॥ अनुद्रुतः संय॥
॥ति येन केवलं बलस्य शत्रुः प्रशशंस शीघ्रतां॥५२॥ करोतेः समुच्चये सामान्य

च्चनस्येत्यनुप्रयोगः॥ चक्र इति॥ अन्यत्र तिङ्क्ष्वचित्र्या त्सौशाब्दास्त्यो गुणः सुपां तिङां
च व्युत्पत्तिः॥ सौशब्द्यमिति लक्षणात् समुच्चयश्चालंकारः॥५१॥ सलीलेति॥ संय
ति युद्धे समुदाये स्त्रियां संयत्समित्याजिसमीयुद्धमित्यमरः॥ येन रावणेन नानुद्रुतो
ऽनुधावितः बलस्य शत्रुरिंद्रः अभ्रमोर्भर्तुरैरावतस्य सलीलयातानि गंभीर
गमनानि न प्रशशंस तथा उच्चैःश्रवसः स्वाश्वस्य चित्रं नानाविधं पदक्रमं पादवि

क्षेपंअर्द्धपलापितादिगतिविशेषमित्यर्थः॥नप्रशशंसकिंतुकेवलंशीघ्रतांशीघ्रगा
मितामेवप्रशशंसअन्यथाशीघ्रंमामग्रस्कंधमारोहिष्यतीतिभयादितिभावः॥५२॥अ
शक्नुवन्निति॥अधीरलोचनोऽस्थिरदृष्टिःकौशिकोमेरुद्रवत्कुश्व॥महेद्रगुग्गुलूलू
कव्यालग्राहिषुकौशिकइत्यमरः॥सहस्ररश्मेःसूर्यस्येवयस्यरावणस्यविक्रमकर्मणोदर्शनंसो

॥अशक्नुवन्सोढुमधीरलोचनःसहस्ररश्मेरिवयस्यदर्शनं॥प्रविश्यहेमा॥
॥द्रिगुहागृहांतरंनिनायबिभ्यद्दिवसानिकौशिकः॥५३॥ श्रीरामकृष्ण

ढुंअशक्नुवन्हेमाद्रेर्गुहैवगृहंतस्यांतरंप्रविश्यबिभ्यत्तथापिनिष्पमानएवबिभेतीःशत
रिनुमभावः॥दिवसानिनिनाय॥घस्रोदिनाहनीवातुक्लीबेदिवसवासरौइत्यमरः॥कौ
शिकइत्यभिधायाःप्रस्तुतैकगोचरत्वेनाभयश्लेषोपिविशेष्यश्लेषासंभवात्उलूकविष
यशक्तिमूलोध्वनिःसन्सहस्ररश्मेरिवेत्युपमानिर्वाहकत्वाद्वाच्यसिद्ध्यंगं॥५३॥

बृह॰छिलेति ।। बृहती शिलेव निष्ठुरकंठस्य घट्टनात् अभिघातात् विकीर्णा निक्षिप्ता लोला श्चंचला
श्चाग्नीकणा स्फुलिंगा यस्य तत् अतएव प्रसहिष्णुतमनभिभावुकं प्रसहनमभिभव इति वृत्ति
कारः ।। अलंकृञ्जीसादिना इष्णुच् ।। वैष्णवं चक्रं सुदर्शनं जगत्प्रभोः सकललोकैकस्वामिनः
अस्य सुरद्विषो रावणस्य कंधरायां अधि अधिकंधरं अधिग्रीवं ।। विभक्त्यर्थेऽव्ययीभावः ।।

।। बृहच्छिलानिष्ठुरकंठघट्टनाद्विकीर्णलोलाग्निकणं सुरद्विषः ।। जगत्प्रभो ।।
।। रप्रसहिष्णुर्वैष्णवं न चक्रमस्याक्रमताधिकंधरं ।। ५४ ।। हे रामचंद्र

अव्ययीभावश्चेति नपुंसकत्वाद्ध्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वत्वं कंठो गलो अथ ग्री
वायां शिरोधिः धः कंधरेत्यपीत्यमरः नाक्रमत न प्रतिहतं न क्रमते स्म न प्रवर्तते स्म किंतु प्र
तिहतमेवेत्यर्थः वृत्तिसर्गतायनेषु क्रमः इति वृत्त्यात्मनेपदं वृत्तिरप्रतिबंधः ।। ५४ ।। वि
भिन्नेति ।। स रावणो मदेन दर्पेण दानेन च ।। मदो दर्पेभदानयोरिति विश्वः ।। दंती गज इव

विभिन्नो विघट्टनः शंखो निधिभेदः कंबुश्चयेन सः सन् शंखो निध्यंतरे कंबुल्ललाटास्थिन
खेषुचेति विश्वः॥ अकलुषं कलुषं स्युदं आविलं च्वाभवत्॥ कलुषीभवन् निरस्तगांभीर्य
मविकारित्वमगाधत्वं च यस्य तत् आपास्तानि पुष्पाणि पुष्पकविमानं च च यस्मात् पुष्पप
क्षे वैभाषिकप्रत्ययः मनुष्यस्येव धर्मः स्य अस्तुत्वादिर्थस्येति क्षिरस्वामीति तस्य मनुष्यधर्मणो ध

॥विभिन्नशंखः कलुषीभवन्मुहुर्मदेन दंतीव मनुष्यधर्मिणः॥ निरस्तगांभी॥
॥र्यमपास्तपुष्पकं प्रकंपयामास न मानसं न सः॥५५॥ श्रीरेणुकाप्रसन्नभग॥

नरस्य धर्मोऽस्य अस्तीति च कवलात् मानसं चित्तं तदिव सरश्च मानसं सरसि स्वांते॥ इति विश्वः
मडुनः प्रकंपयामास न क्षोभयामास॥ सेतिनि किंतु प्रकंपयामासैवेत्यर्थः कुबेरस्य महामहिम
तया संभाविताप्रकंपित्वनिवारणाय नञ्द्वयं संभाव्य निषेधनिवर्तनेन दोषप्रतिषेधादिति
वामनः॥ अत्र दंतीरावणयोः प्रकृताप्रकृतयोः श्लेषः॥५५॥ श्रीराम श्रीहक्क श्री श्री

रा

॥मा॰का॰ रणे क्षितिं ॥ किंच रणेषु प्रचेतसा वरुणेन प्रहिताः प्रयुक्ता उरगैर्नाम महासर्पास्तैर ज्जबद्ध येरगरा स॰स॰ १
ज्जैजरज्जवः नागपाशा इत्यर्थः ॥ तस्य रावणस्य सरोषेण हुंकारेण पराङ्मुखीकृताः व्यावर्ति
ताः अतएव सभयाः सयोजवेन प्रहर्तुः प्रयोक्तुः प्रचेतस एव कंठं प्रपेदिरे ॥ अत्र परिहिं

॥ रणेषु तस्य प्रहिताः प्रचेतसा सरोषहुंकारपराङ्मुखीकृताः ॥ प्रहर्तुरेवो॥
॥ रगराजरज्जवो जवेन कंठं सभयाः प्रपेदिरे ॥ ५६ ॥ श्री श्री श्री श्री ॥३०॥

शंकर

स्यार्थं प्रयुक्तस्याप्युरगस्य वैपरीत्येन स्वकंठग्रहणादनर्थोत्पत्तिरूपो विषमोलंकारः ॥
॥३०॥ विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेदिति लक्षणात् ॥ ५६ ॥ शेषशाई प्रसन्न॥

क्षणं तदग्रे वक्ष्यामः ॥७०॥ न हि किं नु च्छिन्नभूते नेयस्त्र आह ॥ तथापीति ॥ तथापि वक्ते
न निर्णीतिपि तेन त्वं मय्यपि बलभद्र वदे वैयापराद्धार्थः ॥ गुरुरित्येव यद्गौरवं आदरः ॥ न
ह्गौरवं जल्पतो जल्पतः प्रयोज्य ॥ कर्मण मममे प्रयोजककर्तृत्वं उपैति ॥ अतो वक्ष्यामीत्यर्थः ॥
न हि पंडितैस्सादरं पृष्टस्या विशेषज्ञः ॥ स्यादत्वनूक्तौ भावो युक्त इति भावः ॥७१॥ ननु रामे

॥ तथापि यन्मय्यपि ते गुरुरित्यस्ति गौरवं ॥ तत्प्रयोजककर्तृत्वमुपैति मम जल्पतः ॥७१
॥ वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव ॥ अनंता वाङ्मयस्याहो गेयस्येव विचित्रता ॥७२

णैव सर्वप्रपंचे भोक्तं ॥ संप्रति किं तेन वाच्यमस्तीत्याशंक्य यथाप्रपंचोयमिति हृदि निधाय
॥ स्फुटमाह ॥ वर्णैरित्येयेन ॥ कतिपयैः परिमितैः वर्णैः पंचाशन्मात्रैरेवमातृकाक्षरैः कतिपयैः स
प्तभिरेव स्वरैः निषादादिभिः ग्रथितस्य गुंफितस्य वाङ्मयस्य शब्दजालस्य एकाचो ॥ निस्सम

यइछंतीति स्वार्थे मयट्॥ गीयत इति गेयं तस्य गायनस्यैव विचित्रता। अनंतता। अनंतभेदा
र॥ चनाभेदादपरिमितता भवतीत्यर्थः॥ आहोस्वित्तेन साधूक्तेष्वपि विशेषानं यान्मू मापि वक्तु
व्यमस्तीत्येको भावः॥ तस्य दुरुक्तान्यमेवास्तीत्यर्थः। अस्य कर्यवेमि चोपादानादनेकैवेपमुपमा

॥ बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते॥ अनुस्यूतार्थसंबंधः प्रबंधो दुरुदाहरः॥७२

॥७४। बह्वपीति॥ स्वेच्छया स्वप्रतिभानुसारेण प्रकीर्णं असंगतं बह्वपि कामं यथेष्टमभि
धीयते॥ किंतु अनुस्यूतोऽर्थसंबंधः पदार्थसंगतिर्यस्मिन्स प्रबंधः संदर्भः। दुरुदाहरो दु
र्वच॥ हरतेः खश्प्रत्ययः॥ रामेणानुसंगतमेवोक्तं इति स्तुतिः असंगतमेवोक्तमिति निंदा॥
२२चावगम्यते॥७३

म्रदीयसी। निकुरालः वक्रारो म्रदीयसीमपि सुकुमाराक्षरां श्लक्ष्णतरां तथापि घनां अर्थ
गुर्वि अन्यत्र सांद्रां कदलिदलकल्पयामित्यर्थः।। अन्येन्यर्बहुभिर्गुणैः श्लेषादिभिर्नतनुभिश्च
कल्पितां रचितां निर्मितां च चित्रां शब्दचित्रां चित्ररूपां च वाचं घटीशारीमिव प्रसारयंतीरा

।।म्र।दीयसीमपि घनामनल्पगुणकल्पितां।। प्रसारयंती निपुणा
।।श्चित्रां वाचं पटीमिव ।।७४।। पार्वतीरमणप्रसन्न।। श्रीरामा

मवागुप्येवं विधोनिस्तुतिः।। रामकाकुत्स्थनेवं विधा निंदा च गम्यते अत्र श्लेषस्य शुद्धविषयासं
भवेन सर्वालंकारवाधकत्वात् उपमा प्रतिमोत्थापितः प्रफुल्ला प्रफुल्लतश्लेषोयमित्यलंकारसर्वस्व
कारः एवं च पूर्णोपमायां निर्विषयत्वप्रसंगात् श्लेषप्रतिमोत्थापितोयमुपमैवेत्यन्ये ।।७४।।

॥३५॥

अथोद्धवः स्वसिधांतवर्णयितृष्वे स्तुत्यागर्वं परिहरन् हरिमभिमुखीकरोति ॥ विशेषेति ॥
शे विंषं विद्वान् तस्य विशेषविदुषः विशेषज्ञस्य गतिगम्यानि पाठात् द्वितीयासमासः तत्पुरु
षे शास्त्रं निति शास्त्रे निति उद्ग्राह्येत उपन्यसन यितियत् अनुगृहीतमुपन्यस्तमिति चेजयति

॥ विशेषविदुषं शास्त्रं यत्त्वेह्याश्रयेत पुरः ॥ हेतुः परिचयः स्थै
॥र्ये वक्तुर्गुणनिकैव सा ॥७८॥ श्रीभीमातिरवासिविठ्ठल

सा तदुद्ग्रहणमित्यर्थः विधेयप्रधानात् स्त्रीलिंगत्वं ॥ वक्तुरुद्ग्राहितुः परिचयस्थैर्ये अभ्या
सदार्ढ्ये हेतुः गुणनिका आम्रेडितमाम्नानमेवेति यावत् ननु चैतुष्य प्रकटनमिति भावः ॥
गुण आम्रेडने चौरादिकः । ण्यासः श्रंथो युच् ल्युटः संज्ञायां कन् केन पूर्वपदस्य कारः ॥७८॥

॥३५॥

री द्विषो रिपून् उपरुंधंतु व्रजे गाइव मा रिष्मतां अरीनावृण्वंत्वित्यर्थः ।। दुहियाचिरु
धीति द्विकर्मकत्वं ।। तत्रपुरिव्रजादावकथितं कर्म अन्यदीप्सितं कर्म ।। ६४ ।। तर्हि पार्थप्रा
र्थनायाः का गत्या तिरिस्ता शंक्यापेक्षेव ।। निरि सारु ।। यजतामिति ।। पांडवो युधिष्ठिरो
यजतां यागं करोतु ।। इंद्रः स्वर्गमवतु रक्षतु ।। इनोर्कस्तपतु ।। प्रकाशतां वयं द्विषतोरीन् हनाम

।। यजतां पांडवः स्वर्गमवत्विंद्रस्तप स्त्विनः ।। वयं हनाम
।। द्विषतः सर्वः स्वार्थं समीहते ।। ६५ ।। विश्वेश्वरमत॰

श्लोक ।। प्राप्यतां विद्युतां संपत्संपर्कादर्करोचिषां ।। शस्त्रैर्द्विषच्छिरश्छेदप्रोच्छलच्छोणितोक्षितैः ।। ६६ ।।

मारयामः ।। आदुत्तमस्यपिच्चेसाडागमः सर्वत्रप्राप्तकाले लोट् ।। तथाहि सर्वोजनः स्वार्थं स्व
प्रयोजनं समीहते अनुसंदधाते ।। इंद्रादिसमानयोगक्षेमो न पार्थ इत्यर्थः ।। अर्थांतरन्यासः ।। ६५
प्राप्यतामिति किंच द्विषतां शिरश्छेदेन प्रोच्छलता उच्छलता शोणितेनोक्षितैः सिक्तैः शस्त्रै
रर्करोचिषां संपर्काद्विद्युतां संपत् श्रीः प्राप्यतामिति निदर्शनालंकारः ।। ६६ ।।

इतीति॥ इतीत्थं संरंभिणः संक्षुभितस्य बलभद्रस्य वाणीरालेख्यदेवताः चित्रलिखितदेव
ताः सभायाः सदोगृहस्य भित्तीनां प्रतिध्वानैः प्रतिध्वनिव्याजेनेत्यर्थः॥ भयादन्ववदन् अ
नुमोदितवत्य इवेत्युत्प्रेक्षा॥ ६७॥ निशम्येति॥ अधःकृतमक्षजमिंद्रियज्ञानं येन अधोक्षजो
हरिः॥ ताः शेषस्य शेषावतारस्य बलभद्रस्य गाः वाचः शेषगवीः॥ गोरतद्धितलुकि टच्॥

॥इति संरंभिणो वाणीर्बलस्यालेख्यदेवताः॥ सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव॥ ६७॥
॥निशम्य ताः शेषगवीरभिधातुमधोक्षजः॥ शिष्याय बृहतां पत्युः प्रस्तावमदिशद्दृशा॥ ६८

टित्वात् ङीप्॥ निशम्य श्रुत्वा। निशम्यतीति श्रवणे तदानीं शामयत्यपीति भट्टमल्लः॥ न
शाम्यतेरिदं रूपं अन्यथा निशमय्येति स्यात्॥ अत एव वामनः निशम्य निशमय्य शब्दौ प्र
कृतिभेदाद् बृहतीनां वाचां पत्युः बृहस्पतेः शिष्याय उद्धवाय अभिधातुं वक्तुं दृशा दृष्ट्या संज्ञ
या प्रस्तावमवसरमदिशत्॥ आदिष्टवान्॥ प्रस्तावः स्यादवसर इत्यमरः॥ ६८॥ ॥

भारतीति ।। अथबलकृष्णाभ्यनुज्ञानंतरमुद्धवः आहितः भरः अर्थगौरवं यस्यां तां तथ्यां यथार्थां
भारती वाचमनुद्धतमविनंयथा तथागदस्याग्रजं बलं अग्रेपुरतः इतिभागःश्योक्तिः उतथ्यस्य
महर्षेरनुजो बृहस्पतिः ।। उतथ्यानुजो जीवइत्यमरः तद्वत्तेन तुल्यंजगादतेनतुल्यं क्रियाचेद्व

।।भारतीमाहितभरामथानुद्धतमुद्धवः ।। तथ्यामुत्
।।त्थ्यानुजवज्जगादाग्रेगदाग्रजं ।। ६९ ।। श्री

तिः तद्धितेयमुपमा ।। ६९ ।। किं जगादेत्यत आह ।। संप्रतीति संप्रति मुसलपाणिना ब
लभद्रेणकेश्यूरेणेति ध्वनिः उक्ते सति वक्तुमसांप्रतं आयुक्तं साधूक्तत्वात् आभ्यास
समानयोगक्षेमप्रसंगादिति ध्वनिः सांप्रतंशब्दस्याव्ययार्थत्वात् ह्रयोगेशाकृ धषेया

दिनानुमतं तथाहि ॥ लेख्येन पत्रेण अर्थ वाच्ये निर्धारिते निर्णीते सति वाचिकं स्यात् ॥ हृता
र्थो वाचि संदेशवचने मित्यर्थः ॥ संदेशवाक् वाचिकं स्यादित्यमरः वाचो व्याहृतार्थायामिति
टक् ॥ उक्ता खलु न वाच्यं खल्वित्यर्थः खलुः आद्यः प्रतिषेधो सोन। क्यौ लंकारे निषेधवाक्या
जिज्ञासानुनये ष्विस्मृ भय ग्रापि अमरः ॥ अलंखल्वोः प्रा निषेधयोः प्राचांक्त्वे ति क्त्वाप्रत्ययः ॥

॥ संश्रय सांप्रतं वक्तुमुक्ते मुसलपाणिना ॥ निर्धारिते
॥ र्थि लेख्येन खलू क्त्वा खलु वाचकं ॥ ७० ॥ वाचिके

इत्यनयादौ खल्वादय इति निषेधस्योद्वेजुकाभिप्राय त्वा ॥ नञर्थ खलुराद्व स्यानुद्वेक
त्वात्रज्ञ वेदे वपदादो प्रयोगे न दुष्यति इत्यनुसंधेयं लिखितो र्थो वाचिकमिव बलो के मर्दाल
रन वकाशा बिंबकारणात् स्पष्टः तावनूद्दिष्टान्तः स्तुतिव्याजेन निंदावगमात् व्याजस्तुतिश्चलं

कःसश्चायंपक्ष्योक्षोभ्युपेवनिर्वादेनोक्तः-वस्तुतस्तुशूराणामाग्निपक्षरावेष्टः।।शास्त्रसं
वादीच।।यथाह-कामंदकः-।।यदासमसंप्रसभंनिहंतुपराक्रमैर्दूहृ जितिमप्यमित्रं।।तदाभि
यायादहितानिकुर्वन्नुपायतःकर्शनपीडनानिसभिप्रेयाह।।नीतिरिति।।परशत्रुः।।आ

।।नीतिरापद्दियद्गम्यपरस्तन्मानिनोह्रियै।।विधुर्विधुंतु
।।दस्येवपूर्णस्तस्योत्सवायसः।।६१।। श्रीरेणुकाप्रसन्न

पदिगम्यःशत्रिर्नीतिरितियत्तदापदिगम्यमनंमानिनः।।शौर्याभिमानवतोह्रियेलज्जा
करमित्यर्थः।।किंतुपूर्णउपचितगात्रःसशत्रुस्तस्यमानिनोविधुश्चंद्रःविधुंतुदतीतिहिन
स्तीतिविधुंतुदोराहुरिवविध्वरुषोस्तुदइतिखशप्रत्ययेनुमागमः।।तस्येवोत्सवाय

ऽतो बलिनाबलवानेव यातव्यः ।। बलिश्च्य चयमिति भावः ।। ८१ ।। तर्हि पूर्वोदाहृतम
न्वादिशास्त्रविरोधः स्यादित्याशंक्याह ।। अन्यदिति ।। युद्धं खलमनगतिं प्रसह्यपीडन
क्षममितियावत् ।। सत्वं बलमन्यत् शास्त्रेणोदाहृतं मन्वादिशास्त्रेण नियंत्रितं परव्य
सनकालेनियमितं सत्वमन्यत् ।। उक्तानुक्तत्वे लक्षणवैलक्षण्यमन्यछद्धार्थत्वयोः

।। अन्यद्युद्धं खलुं सत्वमन्यच्छास्त्रनियंत्रितं ।। समानाधि
।। करण्यं हि तेजस्तिमिरयोः कुतः ।। ८२ ।। श्री रामनप्रसन्न

सापेक्षत्व निरपेक्षत्वाभ्यां मिथो विरोधान्नैकशास्त्रार्थत्वं संभवतीत्यर्थः अत्र दृष्टां
तमाह ।। तेजस्तिमिरयोः समानमधिकरणं ययोस्तेतयोर्भावः ।। सामानाधिकरण्यमे
काश्रयत्वं कुतः न कुतश्चित्तयोः सहावस्थानविरोधादिति भावः ।। तस्मादुभयोरु

दिनानुदितहोमवद्भिन्नशास्त्रार्थत्वादितरेतरशास्त्रविरोधो न बाधक इति भावः ॥ ६२
तर्हि किमिदानीं कार्यमत आह ॥ इंद्रेति ॥ इंद्रप्रस्थस्य पार्थनगरस्य गमो गमनं ग्रहवृ
श्चिरनिगमश्चेति अप्प्रत्ययः ॥ मा कारि नाव भा क्रियतामेवेत्यर्थः ॥ यावत्तावत्परिच्छेदे
कार्त्स्न्ये मानावधारणे ॥ इति विश्वः ॥ कृञः कर्मणि लुङ् । माङि लुङ् । स्याशिरर्थे न माङ् । यो

॥ इंद्रप्रस्थगमस्तावत्कारि मा संतु चेदयः ॥ आस्माकदंतिसांनिध्याद्वामनीभूतभू
रुहः ॥ ६३

ग इत्यड्प्रतिषेधः । किंतु चेदयश्चैद्यदेशाः ॥ आस्माका इमे आस्माकाः ॥ युष्मदस्मदो
रन्यतरस्यां खञ् चेति विकल्पादण्प्रत्ययः ॥ तस्मिन्नणि च युष्माकास्माकौ इत्यस्माकादे
शः ॥ संनिधिरेव सांनिध्यं स्वार्थे ष्यञ्प्रत्ययः ॥ आस्माकानां दंतिनां सांनिध्याद्वामनीभूताः
शाखाभंगात् खर्वीभूता भूरुहो येषां ते न तथोक्ताः ॥ संतु चेदियात्रैव क्रियतामित्यर्थः ॥

।।३०।।

साच प्रस्तुता प्रस्तुतेनैव स्वकार्येण गम्यत इति स्वकार्येण पर्यायोक्तमलंकार: ।। कारणं ग
म्यते यत्र प्रस्तुता:कार्यवर्णनान्प्रस्तुतेन संबंधं तत्पर्यायोक्तिमिति लक्षणम् ।। ६३ ।।
निरुद्धेति ।। दाशार्हा यादवा: विवधो धान्यादि प्राप्ति: ।। आसार: सुहृद्बलं प्रासारस्तृण
काष्ठादिप्रवेश: ।। धान्यादेर्वीवध: प्राप्तिरासारस्तु सुहृद्बलं प्रसारस्तृणकाष्ठादे: प्रवेश ।

।। निरुद्धवीवधासारप्रासारा गा इव व्रजं ।। उपरुंधंतु
।। दाशार्हा: पुरीं माहिष्मतीं द्विष: ।। ६४ ।। श्री

इति वैजयंती ।। निरुद्धो येस्तेन तथोक्ता: ।। अन्यत्र निरुद्धो वीवधानां प्रत्याहारापरनाम्नां
स्कंधवाह्य क्षिराद्याहरणसाधनभारविशेषाणां उभयतो बद्धशिक्यस्कंधवाह्यकाष्ठं आ
सारप्रासारो प्रवेशश्च निर्गमो येस्तेन तथोक्ता: ।। वीवधो विवधो भार: प्रत्याहारश्चैकथ्यत
इति हलायुध: ।। व्रजं गोष्ठं व्रजस्याद्गोकुलं गोष्ठमिति वैजयंती ।। गा इव माहिष्मती पु

।।३०।।

```
[OrderDescription]
,CREATED=15.10.19 12:24
,TRANSFERRED=2019/10/15 at 12:38:52
,PAGES=75
,TYPE=STD
,NAME=S0002046
,Book Name=M-431-SHISHUPAL VADHAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
```

```
FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
```

```
FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
```

```
FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
```

```
FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,
```